ত্র্যায়ুষং ইত্যাদিনা ললাটাদিষু তিলকং দদ্যাৎ। মাণবকঃ গুরোঃ পাদোপসংগ্রহণং কৃত্বা সায়ং প্রাতঃ সমিধাদানবিধানেন সমিধাদানং কুর্য্যাৎ। ততো হগ্নেরুত্তরে প্রাগগ্র কুশোপরি পশ্চিমাদিতঃ পংক্তিক্রমেণ স্থাপিত জলপূর্ণকলসেষু পশ্চিমাদিক্রমেণ একৈকশঃ কলসাৎ পূর্ব্বে স্থিতা অঞ্জলিনা জলং গৃহীত্বা আত্মানমভিষিঞ্চেৎ। ততঃ পশ্চিম কলসে জলং গৃহ্নাতি। ওঁ যেহপ্স্বন্তরগ্নয়ঃ প্রবিষ্টা গোহ্য উপগোহ্য ময়ূখো মনোহাঃ খলো বিরুজস্তনূদূষিরিন্দ্রিয়হা তান্ বিজহামি। যোরোচনস্তমিহ গৃহ্নামি। ইতি মন্ত্রেণ গৃহ্নাতি। ততস্তেনাভিষিঞ্চতি। ওঁ তেন মামভিষিঞ্চামি শ্রিয়ৈ যশসে ব্রহ্মণে ব্রহ্মবর্চ্চসায়। যেন শ্রিয়মকৃণুতাং যেনাপম্রষতাং সুরাং। যেনাক্ষ্যাবভ্যঃ সিঞ্চতাং যত্বাং তদশ্বিনায় যশঃ। ইতি মন্ত্রেণ। ততঃ পূর্ব্বস্থাপিত দ্বিতীয়কলসাত্তেনৈব মন্ত্রেণ তথৈবাঞ্জলিং গৃহীত্বাভিষিঞ্চেৎ। ওঁ আপো হিষ্ঠেতি মন্ত্রেণ। ততস্তৃতীয় কলসাত্তেনৈব মন্ত্রেণ তেনৈব জলাঞ্জলিং গৃহীত্বা সিঞ্চেৎ। ওঁ যোবঃ শিবতমো রস ইতি মন্ত্রেণ। ততশ্চতুর্থকলসাত্তেনৈব মন্ত্রেণ তথা জলাঞ্জলিং আদায়াভিষিঞ্চেৎ। ওঁ তস্মা অরঙ্গমাম বো ইতি মন্ত্রেণ। ততঃ পঞ্চমাদিকলসাত্তেনৈব মন্ত্রেণ জলাঞ্জলিং গৃহীত্বা তুষ্ণীমভিষিঞ্চতি। ততো মেখলামূর্দ্ধ্বং গত্যা ত্যজতি। ওঁ উদুত্তমং বরুণপাশমস্মদবাধমং বিমধ্যমং শ্রথায়। অথাদিত্য ব্রতে বয়ং তবানাগসো হদিতয়ে স্যাম ইতি মন্ত্রেণ। ততস্তাং ভূমৌ ত্যক্ত্বা তুষ্ণীং শুচিনূতন বাসোহন্যতমং পরিধায় আদিত্যমুপতিষ্ঠতে। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রো মরুদ্ভিরস্থাৎ সায়ং যাবভিরস্থাৎ সহস্রসনিরসি সহস্রসনিং মা কুর্ব্বাবিদন্মাগময়। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রোমরুদ্ভিরস্থাৎ দিবা যাবভিরস্থাৎ। শতসনিরসি শতসনিং মা কুর্ব্বাবিদন্মাগময় ইত্যনেন মন্ত্রেণ। ততো দধিতিলান্ কেশেষু ম্রক্ষয়িত্বা কেশান্ নখান্ বাপয়িত্বা পূর্ব্বা-

সাদিত দন্তকাষ্ঠেন দন্তধাবনং কুর্য্যাৎ। ওঁ অন্নাদ্যায় বূহধ্বং সোমো রাজায়মাগমৎ। স মে মুখং প্রমার্জ্জতে যশসা চ
ভগেন চ। ইত্যনেন মন্ত্রেণ। ততঃ আচম্য স্নাপয়িত্বা সুগন্ধিনা হস্তাবনুলিপ্য নাসিকায়াং মুখে চ ভ্রক্ষয়তি। ওঁ প্রাণাপানৌ
মেতর্পয় চক্ষুর্মে তর্পয় শ্রোত্রং মে তর্পয়। ইত্যনেন মন্ত্রেণ। ততঃ সানুলেপনহস্তাভ্যাং লাজাঞ্জলিং গৃহীত্বা পিতৃতীর্থেন দক্ষিণ-
স্যান্দিশি দদ্যাৎ। ওঁ পিতরঃ শুন্ধধ্বং। ইতি মন্ত্রেণ। ততঃ সর্ব্বগাত্রং সুগন্ধিনানুলিপ্য জপেৎ। ওঁ সুচক্ষুরহমক্ষিভ্যাং
ভূয়াসং। সুবর্চ্চা মুখেন সুশ্রুৎ কর্ণাভ্যাং ভূয়াসং ইতি মন্ত্রেণ। ততো নূতন বাসো রজকধৌতম্বা পরিধাপয়েৎ। ওঁ পরিধাস্যৈ
যশোধাস্যৈ দীর্ঘায়ুত্বায় জরদষ্টিরস্মিঃ শতঞ্চ জীবামি শরদঃ সুবর্চ্চা ভূয়াসং রায়স্পোষমভিসংব্যয়িষ্যে। ইতি মন্ত্রেণ। ততো যজ্ঞো-
পবীতং পরিদধ্যাৎ। ওঁ যজ্ঞোপবীতং পরমং পবিত্রং বৃহস্পতের্যৎ সহজং পুরস্তাৎ। আয়ুষ্যমগ্র্যং প্রতিমুঞ্চ শুভ্রং যজ্ঞো- ১৬৬
পবীতং বলমস্তু তেজঃ। ইত্যনেন মন্ত্রেণ। ততঃ পট্টোত্তরীয়ং বা পরিদধাতি ওঁ যশসা দ্যাবাপৃথিবী যশসেন্দ্রাবৃহস্পতী যশো
ভগশ্চ মাবিদদাদযশো মা প্রতিপদ্যতাং। ইত্যনেন মন্ত্রেণ। ততঃ পুষ্পং গৃহ্লাতি। ওঁ যা অহরদযমদগ্নিঃ শ্রদ্ধাযৈ মেধাযৈ কামন্দ্রিয়ায়
তা অহং প্রতিগৃহ্লামি যশসা চ ভগেন চ। ইত্যনেন মন্ত্রেণ। অথ গৃহীত্বা পরিদধাতি। ওঁ যদযশো হপ্সরসামিন্দ্রশ্চকার
বিপুলং পৃথু। তেন সংগ্রথিতাঃ সুমনস আবধ্নামি যশো ময়ি। ইতি মন্ত্রেণ। ততঃ শুক্লবস্ত্রাঞ্চলেন স্বশিরো বেষ্টন কুর্য্যাৎ।
ওঁ যুবা সুবাসাঃ পরিবীত আগাৎ স উৎশ্রেয়ান্ ভবতি জায়মানঃ। তন্বী বাসঃ কবর উন্নয়ন্তি স্বাধ্যো মনসা দেবয়ন্তঃ।
ইতি মন্ত্রেণ। ততঃ সৌবর্ণকুণ্ডলে কর্ণয়োঃ পরিদধাতি। ওঁ অলঙ্করণমসি ভূয়ঃ অলঙ্করণং ভূয়াঃ। ইতি মন্ত্রেণ ততশ্চক্ষুষী-

অঞ্জয়তি। ওঁ বৃত্রস্য কণীনিকাসি চক্ষুর্দ্দা অসি চক্ষুর্মে দেহি। ইতি মন্ত্রেণ। ততো দর্পণেনাত্মানমভিবীক্ষেৎ ওঁ রোচিষ্ণু
রসি ইতি মন্ত্রেণ। ততশ্ছত্রং ধারয়তি। ওঁ বৃহস্পতেশ্ছদিরসি পাপ্মানো মামন্তর্দ্ধেহি তেজসো যশসো মামন্তর্দ্ধেহি। ইতি
মন্ত্রেণ। ততঃ উপানহৌ পাদয়োর্গৃহ্নাতি। ওঁ প্রতিষ্ঠেস্থো বিশ্বতো মাপতে। ইতি মন্ত্রেণ ততো বৈণবদণ্ডং গৃহ্নাতি। ওঁ
বিশ্বেভ্যো মানাস্তাভ্য পরিপাহি সর্ব্বতঃ। ইতি মন্ত্রেণ ততো বিল্বাদি দণ্ডং অগ্নৌ ক্ষিপেৎ। ততো গুরুর্ব্বিবাহপদ্ধত্যুক্ত-
ক্রমেণ বিষ্টরপাদ্যার্ঘ্যাচমনীয়মধুপর্কাদিভি শিষ্যার্হণং কুর্য্যাৎ। ততঃ শান্ত্যুদকং কৃত্বা শিষ্যমভিষিচ্যাশীর্ব্বাদং দত্ত্বাচ্ছিদ্রা-
বধারণং কুর্য্যাৎ। ততো যথাচারং মঙ্গলাদিকং কৃত্বা শিষ্যস্ত্রিরাত্রং ব্রহ্মচারী নিরামিষং কুর্য্যাৎ ॥ * ॥ ইতি রাজপণ্ডিতশ্রী পশু-
পতিকৃতায়াং দশকর্ম্মদীপিকায়াং সমাবর্ত্তনপদ্ধতিঃ সমাপ্তা ॥ * ॥ * ॥ * ॥ * ॥ ১৬ক

অথ শালাকর্ম্ম পদ্ধতিঃ ॥ * ॥ তত্র পারস্করঃ ॥ পুণ্যাহে শালাং কারয়েদিত্যাদি। ততঃ পুণ্যে অহনি কৃতনিত্যকৃত্যঃ
শুভলগ্নে শুচিরাচান্তঃ বাস্তুপূজাদি প্রকারেন পরিশুদ্ধায়াং ভূমৌ স্বস্তিবাচন পূর্ব্বকং সঙ্কল্পং কুর্য্যাৎ। যথা ওমদেত্যাদি
অমুক গোত্রঃ শ্রীঅমুক দেবশর্ম্মা সর্ব্বসম্পত্তিসিদ্ধিকামঃ পারস্করোক্ত বিধিনা শালাকর্ম্মাহং কুর্ব্বীয়। ইতি সঙ্কল্প্য গণপত্যাদি
নানাদেবতাঃ সংপূজ্য স্তম্ভারোপণার্থমগ্ন্যাদি চতুর্দ্দিক্ষু গর্ত্তং খনিত্বা তেষু গর্ত্তেষু ওঁ অচ্যুতায় ভৌমায় স্বাহেতি স্রুবেণা
জ্যাহুতিং প্রত্যেকং দত্ত্বা মন্ত্রেণানেন চতুর্দ্দিক্ষু চতুরঃ স্তম্ভানারোপয়তি। ওঁ ইমামুচ্ছ্রয়ামি ভুবনস্য নাভিং বসোর্ধারাং প্রতরণীং
বসূনাম্। ইহৈব ধ্রুবাং নিমিনোমি শালাং ক্ষেমে তিষ্ঠতু ঘৃতমুক্ষমাণা। অশ্ববতী গোমতী সূনৃতা সুমহতে সৌভগায়। আত্মা-

শিশুবক্রো গাবো ধেনবো বশ্যমানাঃ। আত্মা কুমারস্তরুণআবৎসো জগদৈঃ সহ। আত্মা পরিশ্রুত কুম্ভ আদধ্যুঃ কলসে রূপ। ক্ষেমস্য পত্নী বৃহতী সুবাসা রয়িন্নো ধেহি সুভগে সুবীর্য্যং। অশ্বাবদ্গোমদূর্জ্জস্বৎপন্নং বনস্পতিরিব। অভি নঃ পূর্য্যতাং রয়িরিদমনুশ্রিয়ো বসান। ততো নিষ্পন্নে গৃহে পুণ্যে হনি শুভে লগ্নে প্রাতঃ আচারাঞ্ছিরঃ স্থিত সিত ধান্যাঢ়কঃ স্কন্ধস্থিত পূর্ণকলস পত্নীসমেতো গৃহং প্রবিশ্য মাতৃকাপূজাং বসোর্ধারাং বৃদ্ধিশ্রাদ্ধঞ্চ কৃত্বা গৃহাভ্যন্তরে স্বগৃহ্যোক্ত প্রকারেণাগ্নিং সংস্থাপ্য প্রোক্ষণীস্থাপনান্তং কর্ম্ম কৃত্বা চরুং শ্রপয়েৎ। যথা অগ্নেঃ পশ্চিমায়াং দিশি পূর্ব্বস্থাপিত তণ্ডুলস্য ওঁ বাস্তোষ্পতি অগ্নীন্দ্র বৃহস্পতি বিশ্বদেব সরস্বতী বাজীভ্য স্বাজুষ্টং গৃহ্নামীতি মুষ্টিমেকাং গৃহীত্বা ওঁ বাস্তোষ্পতি অগ্নীন্দ্র বৃহস্পতি বিশ্বদেব সরস্বতী বাজীভ্য স্বাজুষ্টং নির্ব্বপামীতি উদূখলে নিরূপ্য ও বাস্তোষ্পতি অগ্নীন্দ্র বৃহস্পতি বিশ্বদেব সরস্বতী বাজীভ্য স্বা জুষ্টং প্রোক্ষয়ামীতি প্রোক্ষন্যুদকেন প্রোক্ষয়েৎ। এবং সূর্য্যদেব জন সর্ব্বস্থিমবৎ সুদর্শনবসুরুদ্রাদিত্যেশান জগদেভ্যস্বা পূর্ব্বাহ্নাপরাহ্নমধ্যন্দিন প্রদোষার্দ্ধরাত্র ব্যষ্টিদেবী মহাপথাভ্যস্বা। কর্ত্তৃবিকর্তৃ বিশ্বকর্ম্মৌষধি বনস্পতিভ্যস্বা। ধাতৃবিধাতৃনিধিপতিস্যোন শিবব্রহ্ম প্রজাপতি সর্ব্বদেবতাভ্যস্বা। অগ্নয়ে স্বিষ্টিকৃতে স্বা। এবাং গ্রহণনির্ব্বপণপ্রোক্ষণানি কৃত্বা তূষ্ণীং মুষ্টিদ্বয়স্য গ্রহণনির্ব্বপণপ্রোক্ষণানি কুর্য্যাৎ। ততো মুষলেনাবহত্য শূর্পেণ ত্রিষ্ফলীকৃত্য তণ্ডুলান্ প্রক্ষাল্য চরুস্থাল্যাং কৃত্বা দুগ্ধং দত্বা প্রণীতোদকেনাবসিচ্যাগ্নৌ চরুমধিশ্রপয়েৎ। ততঃ সিদ্ধং চরুং জ্ঞাত্বা জ্বলদুল্মুকেন স্থালীমধ্যং দৃষ্ট্বা ঘৃতশ্রুবেণাভিঘার্য্য উত্তরস্যান্দিশ্যবতার্য্য পুনর্ঘৃতশ্রুবেণাভিধারয়েৎ। ততঃ পত্নীসহিতো গৃহদ্বর্নির্গত্য ওঁ ব্রহ্মণ্ প্রবিশ্যামীতি

জ্ঞাপয়েৎ ওঁ প্রবেশেতি তেনোক্তে ওঁ ঋচং প্রপদ্যে শিবং প্রপদ্যে ইতি মন্ত্রেণ প্রবিশেৎ। ততো হগ্নেঃ পশ্চাদুপবিশ্যা-
জ্যভাগান্তাং কুশণ্ডিকাং কুর্য্যাৎ। তত্র প্রথমং ওঁ অগ্নে ত্বং ভবনামাসি ইতি নাম কৃত্বা ধ্যাত্বা সংপূজ্যাহুতিদ্বয়ং জুহোতি।
ওঁ ইহ বহিরিহ রমশ্ব ইহ ধৃতিঃ স্বাহা। ওঁ ইদমগ্নয়ে। ওঁ উসৃজন্ধরুন্মাত্রে বরুণো মাতরেন্ধয়ন্ রায়স্পোষমস্মাসুদীধরৎ স্বাহা।
ইদমগ্নয়ে। আজ্যেনৈব বাস্তুহোমং কুর্য্যাৎ। ওঁ বাস্তোষ্পতি প্রতিজানীহ্যস্মান্ স্বাবেশো হনমীরো ভবান্। যত্ত্বেমহে প্রতি-
তন্নে জুষস্ব শন্নোভব দ্বিপদেশঞ্চতুষ্পদে স্বাহা ইদং বাস্তোষ্পতয়ে॥ ১ ॥ ওঁ বাস্তোষ্পতে প্রতরণো ন এধি গয়স্ফানো গোভির-
শ্বেভিরিন্দো। অজরাসস্তে সখ্যস্যাম পিতেব পুত্রান্প্রতি তন্নো জুষস্ব স্বাহা। ইদং বাস্তোষ্পতয়ে॥ ২ ॥ ওঁ বাস্তোষ্পতে
সহঁসম্ময়া সহঁসজাতে ক্ষীমহি। হিরণ্যয়াগাতু মত্যা পাহি ক্ষেম উতয়োগেব বন্নোয়ূয়ং পতিস্বস্তিভিঃ সদাতনঃ স্বাহা। ইদং ১৬৯
বাস্তোষ্পতয়ে॥ ৩ ॥ ওঁ অমীবহানাস্তোবাস্তোষ্পতে বিশ্বরূপাণ্যস্মিন্। সখা সুসেব এধি নঃ স্বাহা ইদং বাস্তোষ্পতয়ে॥ ৪ ॥
ততঃ স্থালীপাকস্য জুহোতি অবদান ধর্ম্মেণ। যথা শ্রুচি ঘৃতশ্রুবং দত্ত্বা চরৌ ঘৃতশ্রুবং দদ্যাৎ। তমেব মেক্ষণেনাবদায়
অবদানস্থানে চরৌ ঘৃতশ্রুবং দদ্যাৎ। ওঁ অগ্নিমিন্দ্রং বৃহস্পতিং বিশ্বান্ দেবং নুপহ্বয়ে। সরস্বতীঞ্চ বাজীঞ্চ বাস্তু মে দদতু
বাজিনঃ স্বাহা। ইদমগ্নীন্দ্রবৃহস্পতিবিশ্বেদেবসরস্বতীবাজীভ্যঃ। পুনস্তথৈবাদায় ওঁ সূর্য্যং দেবং জানান্ সর্ব্বান্ হিমবন্তং
সুদর্শনং বসূংশ্চ রুদ্রাণাদিত্যানীশানং জগদৈঃ সহ। এতান্ সর্ব্বান্ প্রপদ্যে হহং বাস্তু মে দদতু বাজিনঃ স্বাহা। ইদং সূর্য্যদেবজন
সর্ব্বহিমবৎসুদর্শনবসুরুদ্রাদিত্যেশানজগদেভ্যঃ। পুনস্তথৈব গৃহীত্বা ওঁ পূর্ব্বাহ্নমপরাহ্নঞ্চোভৌ ম ধ্যন্দিনা সহ। প্রদোষ

সর্ব্বরাত্রঞ্চ ব্যুষ্টিং দেবীং মহাপথাং। এতান্ সর্ব্বান্ প্রপদ্যেঽহং বাস্তুমে দদতু বাজিনঃ স্বাহা॥ ইদং পূর্ব্বাহ্ণা পরাহ্ণমধ্যন্দিনপ্রদোষার্দ্ধরাত্রব্যুষ্টিদেবীমহাপথাভ্যঃ। পুনস্তথৈব গৃহীত্বা ওঁ কর্ত্তারঞ্চ বিকর্ত্তারং বিশ্বকর্ম্মাণমোষধীংশ্চ বনস্পতীন্ এতান্ সর্ব্বান্ প্রপদ্যেঽহং বাস্তু মে দদতু বাজিনঃ স্বাহা॥ ইদং কর্ত্তৃবিকর্ত্তৃবিশ্বকর্ম্মৌষধিবনস্পতিভ্যঃ॥ পুনস্তথৈব গৃহীত্বা ওঁ ধাতারঞ্চ বিধাতারং নিধীনাং পতিভিঃ সহ। এতান্ সর্ব্বান্ প্রপদ্যেঽহং বাস্তুমে দদতু বাজিনঃ স্বাহা॥ ইদং ধাতৃবিধাতৃনিধিপতিভ্যঃ। পুনস্তথৈব গৃহীত্বা ওঁ স্যোনং শিবমিদং বাস্তু দদতং ব্রহ্ম প্রজাপতি সর্ব্বাভ্যো দেবতাভ্যঃ স্বাহা। ইদং স্যোনশিবব্রহ্ম প্রজা-পতিসর্ব্বদেবতাভ্যঃ॥ ততো ভূয়িষ্ঠমবদানমেকং গৃহীত্বা ওঁ আয়াশ্চাগ্নেঽর্ব্বষট্ কৃতং যৎ কর্ম্মণো হরীরিচং দেবাগাতুবিদঃ স্বাহা। ইদমগ্নয়ে স্বিষ্টিকৃতে॥ ততো মহাব্যাহৃতি হোমাদিকং কৃত্বা ব্রহ্মণে দক্ষিণান্দদ্যাৎ। তত উডুম্বর পলাশানি জলাদি ১৭৭
সক্ষীরাণি দূর্ব্বাগোময়দধিমধুঘৃতকুশযবাংশ এতান্ সর্ব্বান্ কাংশ্য পাত্রে কৃত্বা গৃহস্য নাগদন্তশিক্যাদীনি গৃহভিত্তিস্থিতানি দেবতাস্থানানি প্রনিদ্ধান্যেবোপস্থানানি চ তুষ্ণীং প্রোক্ষয়েৎ। ততস্তেনৈব দ্রব্যেণ গৃহস্যাগ্নিকোণমভিমৃষতি। ওঁ শ্রীশ্চ ত্বা যশশ্চ পূর্ব্বে সন্ধৌ গোপায়েতামিতি। নৈর্ঋতকোণমভিমৃষতি। ওঁ যজ্ঞশ্চ ত্বা দক্ষিণে সন্ধৌ গোপায়েতামিতি। বায়ুকোণমভি-মৃষতি। ওঁ অন্নঞ্চ ত্বা ব্রাহ্মণাশ্চ পশ্চিমে সন্ধৌ গোপায়েতামিতি। ঈশানকোণমভি মৃষতি ওঁ উর্কচ ত্বা সুনৃতাশ্চোত্তরে সন্ধৌ গোপায়েতামিতি। ততো গৃহাদ্বহির্নির্গত্য পূর্ব্বাভিমুখীভূয় গৃহস্য দিশ উপতিষ্ঠতে। তত্র গত্বা কৃতাঞ্জলিস্তিষ্ঠন্ আদৌ পূর্ব্বস্যাং। ওঁ কেতাচ মাসুকেতাচ পুরস্তাদ্গোপায়েতামিত্যগ্নির্ব্বৈ কেতাদিত্যঃ সুকেতাতৌ প্রপদ্যে তাভ্যাং নমোঽস্তু তৌ মা পুরস্তা-

দ্গোপায়েতামিতি। অথ দক্ষিণতো দক্ষিণাভিমুখস্তিষ্ঠন্ ওঁ গোপায়মানঞ্চ মা রক্ষমাণা চ তে প্রপদ্যে তাভ্যাং নমো হস্তু তৌ মা দক্ষিণতো গোপায়েতামিতি। অথ পশ্চিমায়াং পশ্চিমাভিমুখঃ ওঁ দীদি বিশ্বাসা জাগৃ বিশ্ব পশ্চাদ্গোপায়েতামিত্যন্নং বৈ। দীদি বিশ্বপ্রাণা জাগৃবি স্তৌ প্রপদ্যে তাভ্যাং নমো হস্তু তৌ মা পশ্চাদ্গোপায়েতামিতি। অথোত্তরতঃ উত্তরাভিমুখঃ। ওঁ অশ্বপুশ্চ মান রুদ্রাশ্চোত্তরতো মাং গোপায়েতামিতি। ওঁ চন্দ্র মা স্বপ্নোবায়ুরণ ত্রাণতো প্রপদ্যে তাভ্যাং নমোহস্তু তৌ নোত্তরতো গোপায়েতামিতি॥ ততো গৃহং প্রবিশতি। ওঁ ধর্ম্মস্ত্রাণারাজং শ্রীস্তূপমহোরাত্রে ত্বা ফলকে। ইন্দ্রস্য গৃহাবসুমন্তো বরূথিনঃ। তানহং প্রপদ্যে সহস্রপ্রজয়া সহ জন্মে কিঞ্চিদস্যুপক্বতসর্ব্বগণঃ সখায় সাধু সম্ভৃতস্তাস্ত্বা শালেহরিষ্টধারান্ গৃহা নঃ সন্তু স[illegible]তঃ ইতি ততো দক্ষিণাং কুর্য্যাৎ। ওমদ্যেত্যাদি কৃতৈতৎ শালাকর্ম্ম সিদ্ধ্যর্থং দক্ষিণাং কাঞ্চনং তন্মূল্যং বাহং ব্রাহ্মণায় দদানি। ততঃ শান্তিং কৃত্বা অচ্ছিদ্রাবধারণং কুর্য্যাদিতি॥ * ॥ * ॥ * ॥ * ॥

॥ * ॥ ইতি শালাকর্ম্ম সমাপ্ত॥ * ॥

॥ * ॥ নমো গণেশায়। স্বস্তি নো মিমীতামশ্বিনা ভগঃ স্বস্তি দেব্যাদিতেরণর্ব্বণঃ। স্বস্তি পূষা অসুরো দধাতু নঃ স্বস্তি দ্যাবাপৃথিবী সুচেতুনা স্বস্তয়ে বায়ুমুপব্রুবামহৈ সোমং স্বস্তি ভুবনস্য যস্পতিঃ। বৃহস্পতিং সর্ব্বগণঞ্চ স্বস্তয়ে স্বস্তয় আদিত্যাসো ভবন্তু নঃ। বিশ্বেদেবা নো আদ্যাঃ স্বস্তয়ে বৈশ্বানরো অসুরগ্নিঃ স্বস্তয়ে। দেবা ভবন্তু ভবঃ স্বস্তয়ে স্বস্তি নো রুদ্রঃ পাত্বংহসঃ। স্বস্তি মিত্রাবরুণা স্বস্তি পথ্যে রেবতী স্বস্তি ন ইন্দ্রশ্চাগ্নিশ্চ নো আদিতে কৃধি। স্বস্তি পন্থামনুচরেম সূর্য্যাচন্দ্রমসাবিব। পুনর্দদতা ঘ্নতা জানতা সঙ্গমেমহি স্বস্ত্যয়নং তার্ক্ষ্যমরিষ্টনেমির্মহদ্ভুতং রায়সং দেবতানাম্। অসুরঘ্নমিন্দ্রসখং সমৎসু বৃহদ্যশো নাবমিবারুহেম। অংহোমুচমাঙ্গিরসং গয়ঞ্চ স্বস্ত্যাত্রেয়ং মনসা চ তার্ক্ষ্যং প্রযতপাণিঃ শরণং প্রপদ্যে স্বস্তি সম্বাধেস্ব ভয়ং নো হস্ত। অথায়ুষ্যসূক্তম্। ওঁ অথায়ুষ্যং ব্রহ্মবর্চ্চস্যম্। রায়স্পোষমৌদ্ভিদং। ইদং হিরণ্যং স্বর্দৃশং বিশতাদিমম্। ওঁ ন তদ্রক্ষাংসি ন পিশাচাশ্চরন্তি। দেবা নামোজঃ সহোজঃ প্রথং হ্যেতৎ যো বিভর্ত্তি দাক্ষায়ণং স দেবেষু কৃণুতে দীর্ঘমায়ুঃ স মনুষ্যেষু কৃণুতে দীর্ঘমায়ু॥ * ॥ অথ বসুধারামন্ত্রঃ। ওঁ শতধারং বায়ুমর্কং স্বর্বিদং নৃচক্ষসস্তে অভিচক্ষতে হবিঃ। যে প্রণন্তি প্রচয়িচ্ছন্তি সঙ্গমেতে দক্ষিণাং দুহতে সপ্তমাতরম্॥ সামগানাম্। ওঁ যদ্বর্চ্চো হিরণ্যস্য যদ্বা বর্চ্চো গবামুত। সতস্য ব্রহ্মণো বর্চ্চস্তেন মা সংসৃজামসি। যজুর্ব্বেদিনাম্। ওঁ বসোঃ পবিত্রমসি শতধারং বসোঃ পবিত্রমসি সহস্রধারম্। দেবস্ত্বা সবিতা পুনাতু বসোঃ পবিত্রেণ শতধারেণ সুপ্বা কামধুক্ষ্ব॥ * ॥ * ॥ * ॥

ওঁ নমো ভগবতে বাসুদেবায়। প্রথমং কৃতনিত্যক্রিয়ঃ কর্ত্তা ছায়ামণ্ডপমাগত্য কৃতপাদশৌচঃ আচম্য·বিষ্ণুং স্মৃত্বা তণ্ডুলান্ গৃহীত্বা

ওঁ স্বস্তি ভবন্তো ব্রুবন্তু ইতি ব্রাহ্মণান্ পৃচ্ছেৎ। ব্রাহ্মণাস্তু ওঁ স্বস্তিতিগৃহীত্বা ওঁ স্বস্তি ন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তিনঃ পূষা বিশ্ববেদাঃ স্বস্তি
ন স্তার্ক্ষোঽরিষ্টনেমিঃ। স্বস্তি নো বৃহস্পতির্দধাতু। ওঁ স্বস্তি স্বস্তি স্বস্তি। অয়মারম্ভঃ শুভায় ভবতু ইতি স্বস্তিবাচ্য সংকল্পং কুর্য্যাৎ।
কুশতিলজলান্যাদায় উত্তরামুখঃ। বিষ্ণুরোঁ তৎ সদদ্যামুকে মাসি অমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রঃ শ্রীঅমুক দেবশর্ম্মা অমুক
গোত্রস্য মৎপুত্রস্য শ্রীঅমুক দেবশর্ম্মণঃ অমুক কর্ম্মাঙ্গভূত গণপত্যাদি নানা দেবতা পূজাপূর্ব্বক মহীগন্ধাদিভিঃ দ্রৈঃ দ্রৈর্ম দ্রৈঃ
শুভ গন্ধাধিবাসন কর্ম্মাহং করিষ্যে। ইতি সঙ্কল্প্য ওঁ যজ্জা গ্রতো দূরমুদৈতি দৈবং তদসুপ্তস্য তথৈবেতি দূরঙ্গমং জ্যোতিষাং
জ্যোতিরেকং তন্মে মনঃ শিব সঙ্কল্পমস্তু। সঙ্কল্পতে ঽস্মিন্ কর্ম্মণি সিদ্ধিরস্তু। ইতি পঠেৎ। ততঃ আসনশুদ্ধি
প্রাণায়ামৌ কৃত্বা ঘটস্থাপনং কুর্য্যাৎ। যথা ভূমিং স্পৃষ্ট্বা। ওঁ ভূরসি ভূমিরস্যদিতিরসি বিশ্বধায়া বিশ্বস্য ভুবনস্য ধর্ত্রী পৃথিবী 
যচ্ছ পৃথিবীং দৃংহ পৃথিবীং মা হিংসীঃ। ধান্যং স্পৃষ্ট্বা ওঁ ধান্যমসি ধিনুহি দেবান্ ধেনুহি যজ্ঞং ধিনুহি যজ্ঞপতিং হিনুহি
মাং যজ্ঞন্যম্॥ ঘটং স্পৃষ্ট্বা ওঁ আজিঘ্র কলসং মহ্যা ত্বা বিশন্ত্বিন্দবঃ পুনরূর্জা নিবর্ত্তস্ব। সা নঃ সহস্রং ধুক্ষোরুধারা
পয়স্বতী পুনর্মাবিশতাদ্রয়িঃ। জলং স্পৃষ্ট্বা ওঁ বরুণস্যোত্তম্ভনমসি বরুণস্য স্কম্ভঃ সর্জ্জনীস্থো বরুণস্য ঋত সদন্যসি বরুণস্য ঋত
সদনী মা সীদ॥ পল্লবং স্পৃষ্ট্বা। ওঁ অশ্বত্থে বো নিষদনং পর্ণে বো বসতিঃ কৃথাঃ। গোভাজ ইত কিলাসন্ যচ্ছ বত পূরুষম্।
ফলং স্পৃষ্ট্বা ওঁ যাঃ ফলিনীর্যা অফলা অপুষ্পা যাশ্চ পুষ্পিণীঃ। বৃহস্পতিপ্রসূতাস্তা নো মুঞ্চন্ত্বংহসঃ॥ পুষ্পং স্পৃষ্ট্বা
ওঁ শ্রীশ্চ তে লক্ষ্মীশ্চ পত্ন্যা অহোরাত্রে পার্শ্বে নক্ষত্রাণি রূপমশ্বিনৌ ব্যাত্তম্। ইষ্টন্নিষাণামুম্ম ইষাণ। সর্ব্বলোকন্মইষাণ

সিরং ধৃত্বা ওঁ সিন্ধোরিব প্রাধ্বনে হসুঘনাশো বাতপ্রমীয়ঃ পতরন্তি জহ্বাঃ ঘৃতস্য ধারা অরুষো ন বাজী কাষ্ঠা ভিন্দন্নূর্মিভিঃ পিন্বমানঃ। স্থাঁ স্থীঁ স্থিরো ভব ইতি স্থিরীকুর্য্যাৎ। ততঃ সামান্যার্ঘ্যং সংস্থাপ্য গণেশাদি পঞ্চদেবতা নবগ্রহ-দশদিক্‌পালষষ্ঠীমার্কণ্ডেয়ান্ পাদ্যাদি নৈবেদ্যান্তেন পূজয়েৎ। ততোঽধিবাসঃ। মহী গন্ধঃ শিলা ধান্যং দূর্ব্বা পুষ্পং ফলং দধি। ঘৃতং স্বস্তিকসিন্দূরং শঙ্খকজ্জলরোচনাঃ। সিদ্ধার্থং কাঞ্চনং রৌপ্যং তাম্রং চামরদর্পণং। দীপঃ প্রশস্তিপাত্রঞ্চ মাঙ্গল্যান্যধিবাস-য়েৎ। অথাধিবাসমন্ত্রাঃ। আদৌ গন্ধেন। ওঁ ভূরসি ভূমিরস্যদিতিরসি বিশ্বধায়া বিশ্বস্য ভুবনস্য ধর্ত্রীং পৃথিবীং যচ্ছ পৃথিবীং দৃংহ পৃথিবীং মা হিংসীঃ। অনয়া মহ্যা অস্য শুভাধিবাসো হস্তু। এবং ওঁ গন্ধদ্বারাং দুরাধর্ষাং নিত্যপুষ্টাং করীষিণীম্। ঈশ্বরী সর্ব্বভূতানাং তামিহোপাহ্বয়ে শ্রিয়ম্। অনেন গন্ধেন। ওঁ ধিষণাসি পার্ব্বতেয়ী প্রতিত্বা দিত্বা স্বধেতু দিবস্কম্ভন্যসি। ধিষণাসি পার্ব্বতী বেত্তু। অনয়া শিলয়া। ওঁ ধান্যমসি ধিনুহি দেবান্ ধিনুহি যজ্ঞং ধিনুহি যজ্ঞপতিং ধিনুহি মাং যজ্ঞন্যম্। ধান্যেন। ওঁ কাণ্ডাৎ কাণ্ডাৎ প্ররোহন্তীঃ পুরুষঃ পুরুষস্পরি। এবা নো দূর্ব্বে প্রতনু সহস্রেণ শতেন চ। অনয়া দূর্ব্বয়া। ওঁ শ্রীশ্চ তে লক্ষ্মীশ্চ পত্ন্যা অহোরাত্রে পার্শ্বে নক্ষত্রাণি রূপমশ্বিনৌ ব্যাত্তম্ ইষ্টন্নিষাণা মুম্ম ঈষাণ সর্ব্বলোম্ম ঈষাণ। পুষ্পেণ। ওঁ যাঃ ফলিনীর্যা অফলা অপুষ্পা যাশ্চ পুষ্পিণীঃ। বৃহস্পতিপ্রসূতাস্তা নো মুঞ্চন্ত্বংহসঃ। ইতি ফলেন। ওঁ দধিক্রাব্ণো হকার্ষ্যং জিষ্ণো-রশ্বস্য বাজিনঃ। সুরভিণো মুখাকরোৎ প্রণতা আয়ুংষি তারিষৎ। দধ্না। ওঁ তেজোঽসি শুক্রমস্যমৃতমসি ধাম নামাসি। প্রিয়ং দেবানামনাধৃষ্টং দেবযজনমসি। ঘৃতেন। ওঁ স্বস্তি ন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তি নঃ পূষা বিশ্ববেদাঃ। স্বস্তি নস্তার্ক্ষ্যো হরিষ্ট- ১১৫

নেমিঃ স্বস্তি নো বৃহস্পতির্দধাতু। স্বস্তিকেন। ওঁ সিন্ধোরিব প্রধ্বনে শূঘনাশো বাতপ্রমীয়ঃ পতয়ন্তি জহ্বা। ঘৃতস্য ধারা
অরুষো ন বাজী। কাষ্ঠা ভিন্দন্নূর্ম্মিভিঃ পিন্বমানঃ। সিন্দূরেণ। ওঁ প্রতিশ্রুৎকায়া অর্ত্তনং ঘোষায় ভসমনন্তায় বহুবাদিনমন-
ন্তায় মূকহুঁ শব্দায়া উড়ুরাঘাতং মহসে বীণাবাদম্। পাণিঘ্নং ক্রোশায় তৃণবধ্মপরম্পরায় শঙ্খধ্বং ধনায় বনমপশ্যতোঽরণ্যায় দাব-
পং। শঙ্খেন। ওঁ সামদ্ধো অঞ্জনং ক্রদ[illegible] মতীনাং ঘৃতমগ্নে মধুমৎ পিন্বমানঃ। বাজীবহন্ বাজীনং জাতবেদা দেবানাং রক্ষি
প্রিয়মাসধস্থম্। কজ্জলেন। ওঁ যুঞ্জন্তি ব্রধ্নমরুষং চরন্তম্। পরিতস্থুষঃ রোচন্তে রোচনা দিবি। রোচনয়া। ওঁ রক্ষোহনো বলগ-
হনঃ প্রোক্ষামি বৈষ্ণবান্ রক্ষোহনো বলগহনো বলয়ামি বৈষ্ণবান্ রক্ষোহনো বলগহনো ঽবস্তৃণামি বৈষ্ণবান্ রক্ষোহনো বলগহনো
উপদধামি বৈষ্ণবীং রক্ষোহনো বলগহনো পর্য্যূহামি বৈষ্ণবীং বৈষ্ণবাস্থঃ। সিদ্ধার্থেন। ওঁ অন্নপতে অন্নস্য নো ধেহ্য- ১৭৬
নমীরস্য শুষ্মিণঃ। প্রদাতারং তারিষ উর্জ্জং নো ধেহি দ্বিপদেশ চতুষ্পদে। অন্নেন। ওঁ হিরণ্যগর্ভঃ সমবর্ত্ততাগ্রে ভূতস্য জাতঃ
পতিরেক আসীৎ। সদাধারং পৃথিবীং দ্যামুতেমাং কস্মৈ দেবায় হবিষা বিধেম। কাঞ্চনেন। ওঁ দৃশাপো রুক্ম উর্ব্ব্যদ্যৌ দুর্ম্মর্ষবায়ুঃ
শ্রিয়েরুচানঃ। অগ্নিরমৃতো অভবদ্বয়োভির্যদেনং দ্যৌরজনয়ৎ সুরেতা। রৌপ্যেণ। ওঁ অসৌ যস্তাম্রোঽরুণঃ। উত বভ্রুঃ সুমঙ্গলঃ যে
চৈনহুঁ রুদ্রা অভিতো দিক্ষু শ্রিতা বৈষাহুঁ হেলয়ীমহে। তাম্রেণ। ওঁ বাতো বাবো মনো বো গন্ধর্ব্বাঃ সপ্তবিংশতি। তে অগ্রে অব-
যুঞ্জন্তুঁ স্তেঽস্মিন্ যবমাদধুঃ চামরেণ। ওঁ আকৃষ্টেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্যঞ্চ। হিরণ্যয়েণ সবিতা রথেনাদেবো
যাতি ভুবনানি পশ্যন্। দর্পণেন। ওঁ মনোজ্যোতির্জ্জুষতা মাজ্যস্য বৃহস্পতির্যজ্ঞমিমং তনোত্বরিষ্টং যজ্ঞং সমিমং দধাতু বিশ্বে দেবাস

স ইহ গাদয়ন্তামোং প্রতিষ্ঠ। দীপেন। ওঁ এতাবানস্য মহিমাতো জ্যায়াংশ্চাধিপুরুষঃ। পাদো২স্য বিশ্বা ভূতানি ত্রিপাদস্যামৃতং দিবি। অলক্তেন। ওঁ কো২সি কতমোসি কস্মৈ ত্বা কাময়ে ত্বা। সুশ্লোক সুমঙ্গল সত্য রাজন্। হরিদ্রয়া। ওঁ প্রতিপদসি প্রতিপদে ত্বা অনুপদসি অনুপদে ত্বা সম্পদসি সম্পদে ত্বা তেজো২সি তেজসে ত্বা। অনেন প্রশস্তপাত্রেণ। ইতি বারত্রয়ং স্পর্শয়েৎ। ইত্যধিবাসঃ। অথ সূত্রবন্ধনম্। ওঁ সূত্রামাণাং পৃথিবীং দ্যামনেহসং সুশর্ম্মাণমদিতিং সুপ্রণীতম্। দৈবীং নাবং সবিত্রা মনাগসমশ্রবন্তী মা রুহে মা স্বস্তয়ে॥ ইতি সূত্রবন্ধনম্॥ * ॥ * ॥ * ॥

ততঃ কৃতনিত্যক্রিয়ো যজমানশ্ছায়ামণ্ডপমাগত্য আচম্য ওঁ স্বস্তি।নো মিমীতেতি স্বস্তিসূক্তং পঠিত্বা সংকল্পং কুর্য্যাৎ। কুশতিলজলান্যাদায় ওঁ তৎসদদ্যামুকে মাস্যমুকে পক্ষে ২মুক তিথৌ অমুকগোত্রঃ শ্রী অমুক দেবশর্ম্মা অমুক গোত্রস্য মৎ পুত্রস্য শ্রী অমুক দেবশর্ম্মণঃ শুভামুক কর্ম্মণ্যভ্যুদয়ার্থং সগণাধিপ গৌর্য্যাদি ষোড়শ মাতৃকা পূজা বসুধারাদানায়ুষ্যজপাভ্যুদয়িক শ্রাদ্ধান্যহং করিষ্যে। ইতি সংকল্প্য ওঁ যজ্জাগ্রত ইতি পঠেৎ। ততঃ সামান্যার্ঘ্যং বিধায় সগণেশ ষোড়শমাতৃকা মূর্ত্তীর্নির্ম্মায় তত্র সিন্দূরতিলকং দত্ত্বা ওঁ ভূর্ভুবঃ স্বর্গণপতি ভট্টারকমহমাবাহয়াম্যারোপয়ামি ওঁ গণপতি ভট্টারক ইহা গচ্ছ ইহ তিষ্ঠ সন্নিহিতো ভব মম কৃতাং পূজাং গৃহাণ অত্রাধিষ্ঠানং কুরু। এতৎ পাদ্যং ওঁ গণপতয়ে নমঃ। ইত্যাদিভিঃ সংপূজ্য ওঁ দেবেন্দ্রমৌলিমন্দার- মকরন্দকণারুণাঃ। বিঘ্নং হরন্তু হেরম্বচরণাম্বুজরেণবঃ। নমস্কুর্য্যাৎ। এবং গৌরী পদ্মা শচী মেধা সাবিত্রী বিজয়া জয়া। দেবসেনা স্বধা স্বাহা শান্তিঃ পুষ্টির্ধৃতিঃ ক্ষমা। আত্মদেবতা কুলদেবতা চ মাতরঃ ষোড়শঃ স্মৃতাঃ। ইতি প্রত্যেকং পাদ্যাদিভিঃ সংপূজ্য ১৭৭

নমস্কৃত্য গৌর্য্যাদিমাতরঃ ক্ষমধ্বমিতি বিসর্জ্জয়েৎ। অথ বসুধারাঃ। নাভিপ্রমাণ স্থানে ভিত্তৌ সপ্তধারা দদ্যাৎ অনেন মন্ত্রেণ। ওঁ শতধারং বায়ুমর্কং স্বর্বিদং নৃচক্ষসস্তে অভিচক্ষতে হবিঃ। যে প্রণন্তি প্রচরিষ্যন্তি সঙ্গমে তে দক্ষিণাং দুহতে সপ্তমাতরম্। ততস্তাসু ধারাসু সিন্দূরতিলকং দত্ত্বা ওঁ চেদিরাজবসো ইহা গচ্ছেত্যাবাহ্য ওঁ চেদিরাজায় বসবে নমঃ ইতি পদ্যাদিভিঃ সংপূজ্য নমস্কৃত্য ওঁ চেদিরাজবসো ক্ষমস্বেতি বিসর্জ্জয়েৎ। অথায়ুষ্যসূক্তম্। ওঁ আয়ুষ্যং ব্রহ্মবর্চ্চস্যং রায়স্পো-ষমৌদ্ভিদম্। ওঁ ন তদ্রক্ষাংসি ন পিশাচাশ্চরন্তি। দেবানামোজঃ প্রথমং হ্যেতদ্যো বিভর্ত্তি দাক্ষায়ণং স দেবেষু কৃণুতে দীর্ঘ-মায়ুঃ স মনুষ্যেষু কৃণুতে দীর্ঘমায়ুঃ॥ ইত্যায়ুষ্যং বহ্বৃচামিতি॥ * ॥ * ॥ * ॥ * ॥ * ॥

অথ ঋগ্বেদিনাং নান্দীমুখশ্রাদ্ধম। কর্ত্তা প্রাঙ্মুখঃ প্রথমং যজ্ঞেশ্বরং সংপূজ্য কৃতাঞ্জলিঃ পঠেৎ। ওঁ যজ্ঞেশ্বরো হব্য সমস্ত কব্য ভোক্তাব্যয়াত্মা হরিরীশ্বরো হত্র। তৎ সন্নিধানাদপযান্তু সদ্যো রক্ষাংস্যশেষাণ্যসুরাশ্চ সর্ব্বে। অনাদিনিধনজ্ঞাননিত্যানন্দ জনার্দ্দন। ময়াত্র শ্রাদ্ধে কর্ত্তব্যে সন্নিধ্যং কুরু কেশব। ভো যজ্ঞেশ্বর অত্র অধিষ্ঠাতা ভব। ততো ব্রাহ্মণস্থাপনক্রমঃ। কর্ত্তা উদঙ্মুখঃ সর্ব্বদক্ষিণে পূর্ব্বমুখৌ দেবব্রাহ্মণৌ তদ্বামে মাতৃব্রাহ্মণৌ তদ্বামে পিতৃব্রাহ্মণৌ তদ্বামে যজ্ঞেশ্বরঃ। ততঃ ওঁ সহস্রশীর্ষা পুরুষঃ সহস্রাক্ষঃ সহস্রপাৎ সভূমিং বিশ্বতো বৃত্বা অত্যতিষ্ঠদ্দশাঙ্গুলম্। ওঁ গন্ধদ্বারাং দুরাধর্ষাং নিত্যপুষ্টাং করীষিণীম্। ঈশ্বরীং সর্ব্বভূতানাং তামিহোপহ্বয়ে শ্রিয়ম্ ইতি কুশব্রাহ্মণান্ সংস্থাপ্য দ্রোণ্যাং সংস্থাপ্য দর্ভময়ব্রাহ্মণেভ্যঃ পাদ্যাদিতাম্বুলান্তং দত্ত্বা সকুশেষু দেবব্রাহ্মণাদিষু স্ব স্ব পা-ত্রেষু স্থাপয়েৎ। ততো ভোজ্যোৎসর্গঃ। সোপকরণামান্নভোজ্যেভ্যো নমঃ ইতি ত্রিরভ্যর্চ্য এতৎ সম্প্রদান ব্রাহ্মণায় নমঃ এতদধিপতয়ে ১৭৮

প্রজাপতয়ে নমঃ। এতেভ্যঃ এতে গন্ধপুষ্পে নমঃ। বিষ্ণুরোঁ। তৎসদদ্যামুকে মাসি অমুক পক্ষে অমুক তিথৌ অমুক গোত্র-
স্যামুক দেবশর্ম্মণঃ অমুক কর্ম্মাভ্যুদয়ার্থং অমুক গোত্রাণাং নান্দীমুখীনাং মাতৃ পিতামহী প্রপিতামহীনাং অমুক্যমুক্যমুকীদেবীনাম্।
অমুক গোত্রাণাং নান্দীমুখানাং পিতৃপিতামহপ্রপিতামহানাং অমুকামুকামুক দেবশর্ম্মণাং বসুরুদ্রাদিত্যরূপাণাম্। অমুক গো-
ত্রাণাং নান্দীমুখানাং মাতামহপ্রমাতামহ বৃদ্ধপ্রমাতামহানাং অমুকামুকামুক দেবশর্ম্মণাং বসুরুদ্রাদিত্যরূপাণাম্। বসুসত্যসংজ্ঞ-
কানাং বিশ্বেষাং দেবানাং অক্ষয় সুখপ্রাপ্তিকাম ইদং সোপকরণামান্নভোজ্যং প্রজাপতি দৈবতং যথাসম্ভব ইত্যাদি। ওঁ অদ্যে-
ত্যাদি কৃতৈতৎ ভোজ্যদানকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণাং কাঞ্চনমূল্যং শ্রীবিষ্ণুদৈবতং যথাসম্ভবেত্যাদি। কৃতৈতৎ ভোজ্যদান কর্ম্মা-
চ্ছিদ্রমস্তু। ওঁ অস্তু প্রত্যুত্তরম্। ততো বাস্তু সংপূজ্য পরভুঞ্জাবিনে ভোজ্যদানম্। তত আমন্ত্রণং কুর্য্যাৎ। দৈবে জলগণ্ডূ- ১৭৯
ষং দত্ত্বা উপবীতী সর্ব্বত্র ত্রিপত্রেণ। ওঁ অদ্যেত্যাদি অমুক গোত্রাণাং নান্দীমুখীনাং মাতৃপিতামহীপ্রপিতামহীনাং অমুক্য-
মুক্যামুকী দেবীনাম্। অমুক গোত্রাণাং নান্দীমুখানাং পিতৃপিতামহপ্রপিতামহানাং অমুকামুকামুক দেবশর্ম্মণাং বসুরুদ্রাদিত্য
রূপাণাম্। অমুক গোত্রাণাং নান্দীমুখানাং মাতামহপ্রমাতামহবৃদ্ধপ্রমাতামহানাং অমুকামুকামুক দেবশর্ম্মণাং বসুরুদ্রাদিত্য
রূপাণাং বৃদ্ধিশ্রাদ্ধার্থং বসুসত্যসংজ্ঞকানাং বিশ্বেষাং দেবানাং বৃদ্ধিশ্রাদ্ধং ভবিষ্যতি তত্র ভবদ্ভ্যাং ক্ষণো দীয়তাং। তাভ্যাম-
নুজ্ঞাতঃ। ওঁ অক্রোধনৈঃ শৌচপরৈঃ সততং ব্রহ্মচারিভিঃ। ভবিতব্যং ভবদ্ভিশ্চ ময়া চ শ্রাদ্ধকারিণা। ইতি পঠেৎ। ততো
মাতৃপক্ষে ওঁ অদ্যেত্যাদি অমুক গোত্রাণাং নান্দীমুখীনাং মাতৃপিতামহীপ্রপিতামহীনাং অমুক্যমুক্যমুকী দেবীনাং বৃদ্ধিশ্রাদ্ধং

ভবিষ্যতি তত্র ভবদ্ভ্যাং ক্ষণো দীয়তাম্। তাভ্যামনুজ্ঞাতঃ। ওঁ অক্রোধনৈরিতি পঠেৎ। এবং পিতৃপক্ষে মাতামহপক্ষে ঽপি। বিষ্ণুপক্ষে ওঁ অদ্যেত্যাদি শ্রাদ্ধরক্ষক শ্রীমহাবিষ্ণো নান্দীমুখশ্রাদ্ধং ভবিষ্যতি তত্র শালগ্রামে শিলারূপিণা ভগবতা ক্ষণো দীয়তাম্। তেনানুজ্ঞাতঃ। ওঁ অক্রোধনৈরিতি পঠেৎ। সর্ব্বশেষে বিষ্ণুপক্ষঃ। সর্ব্বত্র স্বাগতমিতি বদেৎ। সুস্বাগতমিতি প্রত্যু-ত্তরম্। এবং বসুসত্যসংজ্ঞকা বিশ্বে দেবাঃ স্বাগতম্। সুস্বাগতমিতি প্রতিবচনম্। এবং মাতৃপক্ষে পিতৃপক্ষে মাতামহপক্ষে বিষ্ণুপক্ষে ঽপি। দৈবে পাদ্যস্থানে বর্ত্তুলমণ্ডলং কৃত্বা বসুসত্যসংজ্ঞকানাং বিশ্বেষাং দেবানাং পাদ্যস্থানে ইদং দর্ভাসনং অয়ং গন্ধঃ ইদং পুষ্পং ওঁ বসুসত্যসংজ্ঞকা বিশ্বে দেবা ইদং বঃ পাদ্যং ওঁ শন্নো দেবীরভিষ্টয়ে আপো ভবন্তু পীতয়ে। শংযোরভিস্র-বন্তু নঃ। ইতি জলগণ্ডূষং দদ্যাৎ। মাতৃপক্ষে অমুক গোত্রাণং নান্দীমুখীনাং মাতৃপিতামহী প্রপিতামহীনাং অমুক্যমুক্যমুকী দেবীনাং পাদ্যস্থানে ইদং দর্ভাসনং অয়ং গন্ধঃ ইদং পুষ্পম্। ওঁ অমুক গোত্রা নান্দীমুখ্যঃ মাতৃপিতামহী প্রপিতামহ্যঃ অমুক্য-মুক্যমুকী দেব্য ইদং বঃ পাদ্যং ওঁ শন্নো দেবীরিতি জলং দদ্যাৎ। এবং অমুক গোত্রাণাং নান্দীমুখানাং পিতৃপিতামহ প্রপিতামহানাং অমুকামুকামুক দেবশর্ম্মণাং পাদ্যস্থানে ইদং দর্ভাসনং অয়ং গন্ধঃ ইদং পুষ্পম্। অমুক গোত্রা নান্দীমুখাঃ পিতৃপিতামহ প্রপিতামহাঃ অমুকামুকামুক দেবশর্ম্মাণ ইদং বঃ পাদ্যং ওঁ শন্নো দেবীরিতি জলং দদ্যাৎ। এবং মাতামহপক্ষে-ঽপি। ততো বিষ্ণুপক্ষে পাদ্যস্থানে ইদমাসনং অয়ং গন্ধঃ ইদং পুষ্পম্। শ্রাদ্ধরক্ষক মহাবিষ্ণো ইদং তে পাদ্যং ওঁ শন্নো দেবীরিতি জলং দদ্যাৎ। ওঁ বসুসত্যসংজ্ঞকা বিশ্বে দেবা অয়ং বো বিষ্টর আধ্বম। অত্রোপবিশন্তু ভবন্তঃ। মাতৃপক্ষে

অমুক গোত্রা নান্দীমুখ্যঃ মাতৃপিতামহী প্রপিতামহ্যঃ অমুক্যমুক্যমুকী দেব্যঃ অয়ং বো বিষ্টর আখ্বং। অত্রোপবিশন্তু ভবন্তঃ। এবং পিতৃপক্ষে মাতামহপক্ষেঽপি বিষ্টরো দেয়ঃ। ততঃ শ্রাদ্ধরক্ষক শ্রীমহাবিষ্ণো অয়ং তে বিষ্টর আস্ব। অত্রোপবিশতু ভবান্। ততঃ ওঁ অপহতা সুরা রক্ষাংসি পিশাচা যক্ষ্যন্তি পৃথিবীমনু। অন্যত্রেতো গচ্ছন্তু যত্রৈষাং গতং মনঃ। ইতি মন্ত্রেণ শ্রাদ্ধদেশাদ্রাক্ষসাদীনপসার্য্য। ওঁ উদীরতামবর উত পরাস উন্মধ্যমঃ নান্দীমুখাঃ পিতরঃ সোম্যাসা। অসুর ঈভবন্বকা ঋতজ্ঞাস্তেনো হবন্ত নান্দীমুখাঃ পিতরো হবেষু। ইতি মন্ত্রেণ শ্রাদ্ধদেশং হবীংষি চ প্রোক্ষয়েৎ। কেচিৎ গায়ত্র্যা হবিঃ প্রোক্ষণমিচ্ছন্তি। বিশ্বদেবস্থানং গায়ত্র্যা প্রোক্ষ্য ওঁ কুরুক্ষেত্রং গয়াগঙ্গাপ্রভাসপুষ্করাণি চ। পুণ্যান্যেতানি তীর্থানি শ্রাদ্ধকালে ভবন্ত্বিহ। ওঁ দেবতাভ্যো নান্দীমুখেভ্যঃ পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ পুষ্ট্যৈচ স্বাহায়ৈ নিত্যমেব নমো নমঃ। ত্রিঃ পঠেৎ। ততো মন্ত্রজলেন শ্রাদ্ধীয় দ্রব্যং প্রোক্ষয়েৎ। পুণ্ডরীকাক্ষায় নমঃ। গায়ত্র্যা হবিঃপ্রোক্ষণম্। রক্ষার্থমুদকপাত্রং ব্রাহ্মণস্য বামভাগে সদলতুলসীপত্রসযবং স্থাপয়েৎ। রক্ষোঘ্নস্ত্বমসি। ততো হনুজ্ঞা। বিশ্বদেবপক্ষে জলগণ্ডূষং দত্ত্বা কৃতাঞ্জলিঃ। ওঁ অদ্যেত্যাদি অমুকগোত্রস্য মৎপুত্রস্য শ্রীঅমুক দেবশর্ম্মণঃ শুভামুককর্ম্মণ্যভ্যুদয়ার্থং অমুক গোত্রাণাং নান্দীমুখীনাং মাতৃপিতামহী প্রপিতামহীনাং অমুক্যমুক্যমুকী দেবীনাং অমুক গোত্রাণাং নান্দীমুখানাং পিতৃপিতামহপ্রপিতামহানাং অমুকামুকামুক দেবশর্ম্মণাং অমুক গোত্রণাং নান্দীমুখানাং মাতামহপ্রমাতামহবৃদ্ধপ্রমাতামহানাং অমুকামুকামুক দেবশর্ম্মণাং বৃদ্ধিশ্রাদ্ধার্থং বসুসত্যসংজ্ঞকানাং বিশ্বেষাং দেবানাং বৃদ্ধিশ্রাদ্ধং আমান্নাভ্যাং ঘৃতাদ্যুপকরণসমেতাভ্যাং সযবোদকাভ্যাং দর্ভময়-

ব্রাহ্মণয়োরহং করিষ্যে। ওঁ কুরুষ্ব ইতি প্রতিবচনম্। ততো মাতৃপক্ষে জলগণ্ডূষং দত্ত্বা কৃতাঞ্জলি ওঁ অদ্যেত্যাদি অমুক গোত্রস্য মৎপুত্রাস্যামুক দেবশর্ম্মণো হমুক কর্ম্মণ্যভ্যুদয়ার্থং অমুক গোত্রাণাং নান্দীমুখীনাং মাতৃপিতামহী প্রপিতামহীনাং অমুক্যমুক্যমুকীদেবীনাং বৃদ্ধিশ্রাদ্ধমামান্নাভ্যাং সযবোদকাভ্যাং দর্ভময় ব্রাহ্মণয়ো রহং করিষ্যে। ওঁ কুরুষ্বেতি প্রত্যুত্তরম্। এবং পিতৃপক্ষে মাতামহপক্ষে হপি অনুজ্ঞাং গৃহ্ণীয়াৎ। বিষ্ণুপক্ষে জলগণ্ডূষং দত্ত্বা কৃতাঞ্জলিঃ। ওঁ অদ্যেত্যাদি অমুকগোত্রস্য মৎপুত্রস্যামুক দেবশর্ম্মণো হমুককর্ম্মণ্যভ্যুদয়ার্থং শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণোর্নান্দীমুখ শ্রাদ্ধমামান্নেন শালগ্রামশিলা-রূপিণি ভগবত্যহং করিষ্যে। ওঁ কুরুষ্বেতি প্রত্যুত্তরম্। তত আসনোৎসর্গঃ। ওঁ বসুসত্যসংজ্ঞকানাং বিশ্বেষাং দেবানাং এতদ্বঃ কুশাসনং নমঃ। ইতি ত্রিপত্রং দদ্যাৎ। ততো মাতৃপক্ষে জলগণ্ডূষং দত্ত্বা ত্রিপত্রৈঃ পৃথক্ পৃথক্ মাত্রাদীনাং, আসনং দদ্যাৎ। 
পিতৃপক্ষে মাতামহপক্ষে হপি এবং দদ্যাৎ। বিষ্ণুপক্ষে শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণোরিদমাসনং নমঃ। অক্ষয্যাসনয়োঃ ষষ্ঠীতি বচনাৎ। ততোহর্ঘ্যঃ। বিশ্বদেবব্রহ্মণে জলগণ্ডূষং দত্ত্বা দেবব্রাহ্মণাগ্রতঃ চতুষ্কোণ মণ্ডলদ্বয়ং কৃত্বা তত্র কুশদ্বয়ং পাতয়িত্বা তদুপরি দ্রোণীদ্বয়ং অধোমুখং পাতয়িত্বা উত্তানীকৃত্য গায়ত্র্যা প্রোক্ষ্য ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ ইত্যনখেন ছিত্ত্বা ওঁ বিষ্ণোর্মনসা পূতে স্থ ইত্যভ্যুক্ষ্য পবিত্রদ্বয়ং দ্রোণীদ্বয়ে স্থাপয়েৎ। তত্র ওঁ যবোহসি যবয়াস্মদ্দ্বেষো যবয়ারাতীর্দিবে ত্বা অন্তরীক্ষায় ত্বা শুদ্ধন্তাং লোকা দেবসদনা দেবসদনমসি। ইতি যবান্ দত্ত্বা শন্নো দেবীরভিষ্টয়ে আপো ভবন্তু পীতয়ে শংযোরভিস্রবন্তু নঃ। ইতি জলং দত্ত্বা ওঁ বসুসত্যসংজ্ঞকা বিশ্বে দেবা অয়ং গন্ধঃ ইদং পুষ্পং তুষ্ণীং দুর্ব্বাক্ষতাদীনি দত্ত্বা ওঁ

বসুসত্যসংজ্ঞকেভ্যো বিশ্বেভ্যো দেবেভ্যো বো জুষ্টং গৃহ্লামি। ইত্যুৎসৃজ্য। ওঁ বসুসত্যৌ বিশ্বেদেবাঃ অর্দ্ধৌ সম্পন্নৌ। সুস-
ম্পন্নৌ সুসম্পন্নৌ স্তঃ ইতি প্রত্যুত্তরম্। ওঁ বসুসত্যৌ বিশ্বে দেবা দৈবে ক্ষণঃ ক্রিয়তাম্। প্রাপ্নুতং ভবন্তৌ ইত্যুক্তে।
প্রাপ্নুবাব ইত্যুত্তরম্ ততঃ দর্ভেণাচ্ছাদ্য ওঁ স্বাহার্ঘ্যা ইতি ব্রাহ্মণসমীপং নীত্বা স্থাপয়েৎ। ততো মাতৃপক্ষে চতুষ্কোণ মণ্ডলো-
পরি দর্ভত্রয়ং পাতয়িত্বা তদুপরি অধোমুখানি পাত্রাণি পাতয়িত্বা উত্তানীকৃত্য গায়ত্র্যা প্রোক্ষ্য এবং পিতৃপক্ষে মাতামহপক্ষে
২পি। ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ। ইতি নখব্যতিরেকেণ ছিত্বা ওঁ বিষ্ণোর্মনসা পূতে স্থ ইত্যভ্যু পাত্রত্রয়ে স্থাপয়েৎ। ওঁ
যবোঽসি সোমদৈবত্যো গোসবো দেবনির্ম্মিতঃ। প্রত্নমদ্ভিঃ পৃক্তঃ পুষ্ট্যা নান্দীমুখান্ পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহা।
ইতি যবান্ দত্ত্বা ওঁ শন্নো দেবীরিতি জলং দত্ত্বা পূর্ব্বোক্তে গন্ধপুষ্পে দত্ত্বা তুষ্ণীং দূর্ব্বাক্ষতাদীনি দদ্যাৎ। ওঁ নান্দীমুখীভ্যো
মাতৃভ্যো বো জুষ্টং গৃহ্লামি ইত্যুৎসৃজ্য। এবং নান্দীমুখীভ্যঃ পিতামহীভ্যো বো জুষ্টং গৃহ্লামি। নান্দীমুখীভ্যঃ প্রপিতামহীভ্যো
বো জুষ্টং গৃহ্লামি। এবং পিতৃপক্ষে মাতামহপক্ষেঽপি। বিষ্ণুপক্ষে পাত্রমেকং পাতয়িত্বা পবিত্রাদিকং দত্ত্বা সংস্থাপ্য তত
আবাহনম্ আদৌ বিশ্বদেবপক্ষে কুশযবদূর্ব্বাদীন্ গৃহীত্বা ওঁ বসুসত্যসংজ্ঞকান্ বিশ্বান্ দেবান্ আবাহয়িষ্যে। ওঁ আবাহয়
ইত্যনুজ্ঞাতঃ। ওঁ বিশ্বে দেবো স আগতঃ শৃণুতাম ইমং হবং এদং বর্হির্নিষীদত। ইত্যাবাহ্য
ওঁ বিশ্বে দেবাঃ শৃণুতেমং হবং যে মে অন্তরীক্ষে য উপদ্যবিষ্ট যে হবিজিহ্বা উত বা যজত্রা আসাদ্যাস্মিন্ বর্হিষি মাদয়ধ্বম্
ওঁ ওষধয়ঃ সমবদন্ত সোমেন সহ রাজ্ঞা যস্মৈ কৃণোতি ব্রাহ্মণস্তং পারয়ামসি। ইতি ব্রাহ্মণে যবান্ দদ্যাৎ। ওঁ আগচ্ছন্তু

মহাভাগা বিশ্বে দেবা মহাবলাঃ। যে যত্র বিহিতাঃ শ্রাদ্ধে সাবধানা ভবন্তু তে। ইতি পঠেৎ। ওঁ সাবধনাঃ স্ম ইতি প্রত্যুত্তরম্।
ততঃ পিত্রাদিপক্ষে। ওঁ নান্দীমুখান্ পিতৄনাবাহয়িষ্যে। আবাহয় ইত্যনুজ্ঞাতঃ। মাতৃপক্ষে পিতৃপক্ষে মাতামহপক্ষেঽপি
একদৈবাহনং পৃথগাবাহনং নাস্তি॥ ওঁ উশন্তস্ত্বা নিধীমহ্যুশন্তঃ সমিধীমহি উশন্নুশত আবহ নান্দীমুখান্ পিতৄন্ হবিষে
অত্তবে। অগ্নিষ্বাত্তাঃ নান্দীমুখাঃ পিতর ইহাগচ্ছত। সদঃ সদঃ সদত সুপ্রণীতয়ঃ। অত্তা হবীংষি প্রয়তানি বর্হিষ্যথারয়িং
সর্ব্ববীরং দধাতন। ওঁ আয়ান্তু নো নান্দীমুখাঃ পিতরঃ সোম্যাসো গম্ভীরৈঃ পথিভিঃ পূর্ব্বিণেভিঃ। প্রজামস্মভ্যং দদতো
রয়িঞ্চ শতসারদঞ্চ। ওঁ আয়ান্তু নো নান্দীমুখাঃ পিতরঃ সোম্যাসো ঽগ্নিষ্বাত্তাঃ পথিভির্দ্দেবযানৈঃ। অস্মিন্ যজ্ঞে পুষ্ট্যা
মদন্তোঽধিব্রুবন্তু তে ঽবন্ত্বস্মান্॥ ইতি পিতৄনাবাহ্য যবান্ মাতৃপিতৃমাতামহব্রাহ্মণেষু দদ্যাৎ। ওঁ সহস্রশীর্ষেতি বিষ্ণোরাবাহনম্। 
দেবপক্ষে অর্ঘ্যপাত্রদ্বয়ং বামহস্তে নিধায় দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা আপঃ পয়সা সংবভূবুর্যা অন্তরীক্ষা উত পার্থিবীর্যা
হিরণ্যবর্ণা যজ্ঞিয়াস্তা ন আপঃ শিবাঃ সংশ্যোনাঃ সুহবা ভবন্তু। ওঁ বসুসংজ্ঞকা বিশ্বে দেবা এতাবর্ঘ্যৌ বো নমঃ। ইত্যুৎ-
সৃজ্য দদ্যাৎ। ওঁ অর্চত প্রার্চত প্রিয়মেধাসোঽর্চত অর্চন্তু পুত্রক উত পূর্ণ ধৃষ্ণ্বর্চত। পাদাদিশিরঃ প্রভৃতি সর্ব্বগাত্রেভ্যো নমঃ।
ইতি পুষ্পান্তরং দদ্যাৎ। ততো মাতৃপক্ষে কুশাস্তরণম্। অর্ঘ্যপাত্রং বামহস্তে কৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যেতি
পঠিত্বা বিষ্ণুরাং অমুক গোত্রে নান্দীমুখি মাতরমুকীদেবি এষ তে ঽর্ঘ্যো যে চাত্র ত্বামত্রানু নমঃ। ইত্যুৎসৃজ্য দদ্যাৎ। ওঁ অর্চত
ইতি পঠন্ পাদাদিশিরঃ প্রভৃতি সর্ব্বগাত্রেভ্যো নমঃ। ইতি পুষ্পাদি দদ্যাৎ। শেষজলং কিঞ্চিদর্ঘ্যপাত্রে রক্ষেৎ। পাত্রঞ্চ স্বস্থানে

স্থাপয়েৎ। এবং পিতামহীপ্রপিতামহীভ্যাং দদ্যাৎ। এবং পিতৃপক্ষে মাতামহপক্ষেঽপি দদ্যাৎ। ততো বিষ্ণুপক্ষে ওঁ যা দিব্যেতি পঠিত্বা ওঁ শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণো এষ তে ঽর্ঘ্যো নমঃ। ইতি দদ্যাৎ। অর্চ্চতেতি পঠন্ পাদ্যাদি শিরঃ প্রভৃতি সর্ব্বগাত্রেভ্যো নমঃ। ইতি পুষ্পাদি দদ্যাৎ। ততঃ সর্ব্বপাত্রজলং পিতৃপাত্রে আনীয় প্রপিতামহপাত্রেণাচ্ছাদ্য ওঁ নান্দীমুখেভ্যঃ স্থানমসি ইতি স্ববামে কুশোপরি ন্যুব্জং স্থাপয়েৎ। তদুপরি কুশান্তরং দত্ত্বা গোত্রবৃৎপর্য্যন্তং ন স্পৃশেৎ। ততো গন্ধাদিদানম্। ওঁ বসুসত্যসংজ্ঞকা বিশ্বেদেবা এতানি বো গন্ধপুষ্পধূপদীপাচ্ছাদনানি নমঃ। ইত্যুৎসৃজ্য অয়ং বো গন্ধঃ এতদ্বঃ পুষ্পং এষ বো ধূপঃ এষ বো দীপঃ এতদ্ব আচ্ছাদনং সর্ব্বসম্পূর্ণার্থং তাম্বূলং দদ্যাৎ। জলং স্পৃষ্ট্বা মাতৃপক্ষে ওঁ অমুক গোত্রা নান্দীমুখ্যঃ মাতৃপিতামহীপ্রপিতামহ্যঃ অমুক্যমুক্যমুকী দেব্যঃ এতানি গন্ধপুষ্পধূপদীপাচ্ছাদনানি নমঃ। ইত্যুৎসৃজ্য অয়ং তে গন্ধ এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ এতত্তে আচ্ছাদনং সর্ব্বসম্পূর্ণার্থং তাম্বূলম্। কৃতাঞ্জলিঃ। ওঁ অর্চ্চনং সম্পূর্ণং সংকল্পসিদ্ধির- 
স্ত্বিতি ভবন্তো ব্রুবন্তু। ওঁ অস্তু সংকল্পসিদ্ধিরিতি প্রত্যুত্তরম্। এবং পিতৃপক্ষে মাতামহপক্ষেঽপি। ততঃ ওঁ অর্চ্চনং সম্পূর্ণং সংকল্পসিদ্ধিরস্ত্বিতি ভবন্তো ব্রুবন্তু। ওঁ অস্তু সঙ্কল্পসিদ্ধিরস্ত্বিতি প্রতিবচনম্। ওঁ গন্ধাদিদানমিদমচ্ছিদ্রমস্ত্বিতি। ওঁ অস্তু ইত্যুত্তরম্। বিষ্ণুপক্ষে ওঁ শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণো এতানি তে গন্ধপুষ্পধূপদীপাচ্ছাদনানি নমঃ। ইত্যুৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ এতত্তে আচ্ছাদনম্। ওঁ অর্চ্চনং সম্পূর্ণং সঙ্কল্পসিদ্ধিরস্ত্বিতি ভবান্ ব্রবীতু। ওঁ অস্তু সঙ্কল্পসিদ্ধিরিতি প্রত্যুত্তরম্। ওঁ গন্ধাদিদানমিদমচ্ছিদ্রমস্তু। ওঁ অস্তু ইতি প্রত্যুত্তরম্। ততো ঘৃতাক্তমন্নমাদায় পংক্তিশ্রেষ্ঠং

ব্রাহ্মণং পৃচ্ছেৎ। ওঁ অগ্নৌ করিষ্যে। ওঁ কুরুষ ইতি সর্ব্বত্রানুজ্ঞয়া দক্ষিণং জানুং পাতয়িত্বা উদঙ্মুখো দক্ষিণোপবীতী দেবতীর্থে জুহুয়াৎ। অগ্নয়ে কব্যবাহনায় স্বাহা। ওঁ অগ্নয়ে কব্যবাহনায় ইদং নমঃ। ওঁ সোমায় নান্দীমুখায় পিতৃমতে স্বাহা সোমায় নান্দীমুখায় পিতৃমতে ইদং নমঃ। আভ্যাং মন্ত্রাভ্যাং আহুতিদ্বয়ং হুত্বা তুষ্ণীং বারদ্বয়ঞ্চ জলে জুহুয়াৎ। ততো দৈবাদিক্রমেণ হুতশেষং সর্ব্বপাত্রেষু পরিবেশয়েৎ। পিত্রার্থং কিঞ্চিদ্রক্ষেৎ। ততো বহুতরান্নব্যঞ্জনাদিকং সঘৃতং সজলং দত্ত্বা দৈবাদিক্রমেণ পাত্রসমীপে উপবিশ্য পাত্রং জলেন প্রদক্ষিণং পরিষিচ্য ওঁ পৃথিবী তে পাত্রং দ্যৌরপি-ধানং ব্রাহ্মণস্ত্বা মুখে জুহোমি। ব্রাহ্মণানাং ত্বা প্রাণাপানয়োর্জ্জুহোম্যক্ষতমসি। মৈষাং ক্ষেষ্ঠামমুত্রামস্মিন্ লোকে। ইতি পাত্রমভিমন্ত্র্য অতো দেবা অবন্তু নো যতো বিষ্ণুর্বিচক্রমে। পৃথিব্যাঃ সপ্তধামভিঃ। ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদম্। সমূঢ়মস্য পাংশুলে। ইত্যন্নে হনখমঙ্গুষ্ঠং নিবেশ্য বিষ্ণো হব্যং রক্ষস্ব ইদমন্নং ইদং হবিঃ ইমা আপঃ এতান্যুপকরণানি। ইতি নিবেদ্য দৈবে তুষ্ণীং যবান্ দদ্যাৎ। মাত্রাদিপক্ষে ওঁ যবোঽসি যবয়াস্মদ্দেশো যবয়ারাতীঃ। দিবে ত্বা অন্তরীক্ষায় ত্বা পৃথিব্যৈ ত্বা শুন্ধতাং লোকা নান্দীমুখাঃ পিতৃসদনাঃ পিতৃসদনমসি। ইত্যন্নে যবান্ দদ্যাৎ। মধুবাতাস্থানে। ওঁ উপাস্মৈ গায়তানরঃ পবমানায়েন্দবে। অপি দেবা ইয়ক্ষতে ওঁ যে ত্বা হি হত্যে মঘবন্ন বর্দ্ধন্যে হরি বো যে গরিষ্ঠৌ। যে ত্বা নূনমনুমদন্তি বিপ্রাঃ পিবেন্দ্র সোমং সগণো মরুদ্ভিঃ। ওঁ জনিষ্ঠা উগ্রঃ সহ সেতুবায়মন্দ্র ওজিষ্ঠো বহুলাভিমানঃ। অবর্দ্ধন্নিন্দ্রং মরুতাশ্চদত্র মাতা যদ্বীরদধনদ্ধনিষ্ঠাঃ। ওঁ আতূ ন ইন্দ্র বৃত্রহন্নস্মাকমর্দ্ধমাগহি। মহান্মহীভিরূতিভিঃ। প্রত্বমিন্দ্রঃ প্রহূর্ত্তিষ্বাভিবিশ্বা অসি স্পৃধঃ। অসি স্পৃহা জনিতা বিশ্ব-

ভূরসি। ত্বং তূর্য্য তরু রুষ্যতে। ওঁ অক্ষন্নমী মদন্ত হ্যবপ্রিয়া অধূষত অস্তোষত স্বভানবো বিপ্রান্ বিষ্ঠয়া মতীয়ো যাম্বিন্দ্রতে হরী। গায়ত্রীঞ্চ জপ্ত্বা ওঁ বসুসত্যো বিশ্বে দেবা এতে বোঽন্নে সযবোদকে নমঃ। ইত্যুৎসৃজ্য ইমে বিশ্বেভ্যো দেবেভ্যো নমঃ। ইতি বদেৎ। পুনরুপাস্মৈ গায়তা গায়ত্রীঞ্চ জপ্ত্বা মা সুখং বাগ্যতা জুষধ্বং ইতি উক্ত্বা ওঁ অমৃতোপস্তরণমসি স্বাহা ইতি জলগণ্ডূষং দদ্যাৎ। ততো মাত্রাদীনাং পাত্রসমীপে উপবিশ্য পাত্রং প্রদক্ষিণং পরিষিচ্য ওঁ পৃথিবী তে ইতি পাত্রালম্বনং কৃত্বা ওঁ অতো দেবা ওঁ ইদং বিষ্ণুমন্ত্রাভ্যাং অনখমঙ্গুষ্ঠং নিবেশ্য ওঁ উপাস্মৈ গায়তা গায়ত্রীঞ্চ জপ্ত্বা ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা ওঁ অমুক গোত্রা নান্দীমুখ্যো মাতৃপিতামহী প্রপিতামহ্যঃ অমুক্যমুক্যমুকীদেব্যঃ ইদমন্নং সোপকরণং ব্রাহ্মণস্ত্বাহবনীয়ার্থে দত্তং দাস্যমানমন্নং চাতৃপ্তেস্তুৎ সর্ব্বম্। ওঁ অমুক গোত্রা নান্দীমুখ্যো মাতৃপিতামহীপ্রপিতামহ্যঃ অমুক্যমুক্যমুকীদেব্যঃ এতে হন্নে সোপকরণে যোঽত্রত্বামত্রানু নমঃ। ইমে অন্নে অমুক গোত্রাভ্যো নান্দীমুখীভ্যঃ মাতৃপিতামহীপ্রপিতামহীভ্যো নমঃ। ইতি বদেৎ। পুনরুপাস্মৈ দত্ত্বা গায়তা গায়ত্রীঞ্চ পঠিত্বা ওঁ অমৃতোপস্তরণমসি স্বাহেতি জলগণ্ডূষং দত্ত্বা যথাসুখং বাগ্যতা জুষধ্বং ইতি বদেৎ। এবং পিত্রাদি পক্ষে মাতামহাদি পক্ষে যে চাত্র ত্বামত্রানু ইতি বিশেষঃ। ততো বিষ্ণুপক্ষসমীপে উপবিশ্য ওঁ দেব সবিতঃ প্রসব ইতি পাত্রং পরিষিচ্য ওঁ পৃথিবী তে পাত্রমিতি পাত্রমভিমন্ত্র্য ওঁ অতো দেবা ওঁ ইদং বিষ্ণুরিতি মন্ত্রাভ্যামনখমঙ্গুষ্ঠং নিবেশ্য ওঁ মধু মধু মধু ইতি দত্ত্বা গায়ত্রীং জপ্ত্বা ওঁ শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণো ইদমন্নং সোপকরণং শালগ্রামশিলারূপী ভগবানাহবনীয়ার্থে দত্তং দাস্যমানমন্নং চাতৃপ্তেস্তুৎসর্ব্বং। ওঁ শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণোঃ ইদমন্নং সোপকরণং স্বাহা নমঃ। ১৮৭

ইত্যুৎসৃজেৎ। ওঁ মধু মধু মধু ইতি গায়ত্রীঞ্চ জপ্ত্বা ওঁ যথাসুখং বাগ্‌যতো জুষস্ব। ইতি পঠেৎ। ততঃ কৃতাঞ্জলি। ওঁ
দেবতাভ্যো নান্দীমুখীভ্যঃ পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ পুষ্টৈ স্বাহায়ৈ নিত্যমেব নমো নমঃ ইতি ত্রিঃ। ওঁ সহস্র
শীর্ষা পুরুষঃ সহস্রাক্ষঃ সহস্রপাৎ। সভূমিং সর্ব্বতো ভূত্ব অত্যতিষ্ঠদ্দশাঙ্গুলং। ওঁ যোগীশ্বরং যাজ্ঞবল্ক্যং সম্পূজ্য মুনয়ো-
ব্রুবন্। বর্ণাশ্রমেতরাণাং নো ব্রূহি ধর্ম্মানশেষতঃ। মন্বত্রিবিষ্ণুহারীতযাজ্ঞবল্ক্যোশনোঽঙ্গিরাঃ। যমাপস্তম্বসম্বর্ত্তাঃ কাত্যায়নবৃহস্পতী।
পরাশরব্যাসশঙ্খলিখিতাদক্ষগোতমৌ। সাতাতপো বশিষ্ঠশ্চ ধর্ম্মশাস্ত্রপ্রযোজকাঃ। ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ
দিবীব চক্ষুরাততম্। ওঁ দুর্য্যোধনো মন্যুময়ো মহাদ্রুমঃ স্কন্ধঃ কর্ণঃ শকুনিস্তস্য শাখা দুঃশাসনঃ পুষ্পফলে সমৃদ্ধে মূলং রাজা
ধৃতরাষ্ট্রো মনীষী। ওঁ যুধিষ্ঠিরো ধর্ম্মময়ো মহাদ্রুমঃ স্কন্ধোঽর্জ্জুনো ভীমসেনোঽস্য শাখা মাদ্রীসুতৌ পুষ্পফলে সমৃদ্ধে মূলং কৃষ্ণো ব্রহ্ম ১৪৮
চ ব্রহ্মণাশ্চ। ওঁ সপ্তব্যাধা দশার্ণেষু মৃগাঃ কালাঞ্জরে গিরৌ। চক্রবাকাঃ শরদ্বীপে হংসাঃ সরসি মানসে। তেঽপি জাতাঃ কুরু-
ক্ষেত্রে ব্রাহ্মণা বেদপারগাঃ। প্রস্থিতা দূরমধ্বানং যূয়ং তেভ্যো ঽবসীদত। ইতি পঠেৎ। ওঁ বসুসত্যৌ বিশ্বে দেবাঃ সম্পন্নম্।
সুসম্পন্নমিত্যুত্তরম্। মাতৃপক্ষে ওঁ অমুক গোত্রা নান্দীমুখ্যো মাতৃপিতামহীপ্রপিতামহ্যঃ অমুক্যমুক্যমুকী দেব্যঃ সম্পন্নম্। এবং
পিতৃপক্ষে মাতামহপক্ষে চ। বিষ্ণুপক্ষে ওঁ শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণো সম্পন্নম্। সুসম্পন্নমিত্যুত্তরম্। ওঁ বসুসত্যৌ বিশ্বেদেবাঃ
তৃপ্তাঃ স্থ। তৃপ্তাঃ স্ম ইত্যুত্তরম্। অমুক গোত্রা নান্দীমুখ্যো মাতৃপিতামহীপ্রপিতামহ্যঃ অমুক্যমুক্যমুকীদেব্যঃ তৃপ্তাঃ স্থ। তৃপ্তাঃ
স্ম ইত্যুত্তরম্। এবং পিতৃপক্ষে মাতামহপক্ষেঽপি তৃপ্তিপ্রশ্নঃ। ওঁ শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণো তৃপ্তোঽসি। তৃপ্তোঽস্মি ইত্যুত্ত-

রম্। শেষমন্নমপ্যস্তি কিং কর্ত্তব্যং। ইষ্টৈঃ সহ ভুজ্যতাং ইত্যুত্তরম্। ততো হগ্নিদগ্ধাং। ততঃ পূর্ব্বাগ্রেষু দর্ভেষু যবোদকং দত্ত্বা অল্পপিণ্ডং গৃহীত্বা ওঁ যে হগ্নিদগ্ধা মধ্যে দিবঃ স্বধয়া মাদয়ন্তো তেভিঃ স্বরালস্বুনীনিমেতাং যথাবশঃ তন্বং কল্পয়স্ব। ওঁ যে হগ্নিদগ্ধা যে হনগ্নিদগ্ধা যে বা জাতাঃ কুলে মম। ভূমৌ দত্তেন পিণ্ডেন তৃপ্তা যান্তু পরাং গতিম্। ইতি যবোদকেন সার্দ্ধং পিণ্ডং দদ্যাৎ। ওঁ অগ্নিদগ্ধেভ্যো হনগ্নিদগ্ধেভ্যো হস্মৎকুলে প্রসূতমৃতেভ্য এব পিণ্ডো নমঃ ইতি বদেৎ। কৃতাঞ্জলিঃ। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্নসিদ্ধির্ন তথান্নমস্তি। তৎতৃপ্তয়ে হন্নং ভুবি দত্তমেতৎ প্রয়ান্তু লোকায় সুখায় তদ্বৎ। ইতি পঠিত্বা পুনর্জলং দত্ত্বা হস্তং প্রক্ষাল্য হরিং স্মৃত্বা ওঁ অমৃতাপিধানমসি স্বাহা ইতি ব্রাহ্মণেভ্য আপোশানং দত্ত্বা ওঁ পিণ্ডদানমহং করিষ্যে ইত্যুক্তে ওঁ কুরুস্ব ইত্যুত্তরম্। ততঃ পিণ্ডস্থানে ওঁ নিহন্মি সর্ব্বং যদমেধ্যবদ্ভবেদ্ধতাশ্চ সর্ব্বে হসুরদানবা ময়া। রক্ষাংসি যক্ষাঃ ১৮৯
সপিশাচসংঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে। ইতি মন্ত্রেণ ঈশানাদিতঃ পূর্ব্বাগ্রং অষ্টাদশমণ্ডলং কৃত্বা কুশান্ গৃহীত্বা ওঁ অপাং মেধ্যং যজ্ঞিয়ং সদেবং পিণ্ডং শিবমস্তু তে। আচ্ছেত্তারো মারিষং জীবামি শরদম্। ইতি মন্ত্রেণ কুশপত্রমেকং গৃহীত্বা তস্য পশ্চিম দেশে ওঁ অপহতা সুরা রক্ষাংসি বেদিষদ ইতি রেখা ত্রয়মুল্লিখ্য তত্র কুশানাস্তীর্য্য প্রোক্ষ্য ওঁ শুন্ধন্তাং নান্দীমুখাঃ পিতরঃ ইতি কুশোপরি যবোদকং দত্ত্বা ততঃ একং কুশপত্রং গৃহীত্বা ওঁ আয়ান্তুনো নান্দীমুখাঃ পিতরো মনোজবসঃ। ইতি কুশপত্রমেকং ছিত্ত্বা ক্ষিপেৎ। ততো বহুতর কুশান্ গৃহীত্বা ওঁ স্যোনং নান্দীমুখেভ্যঃ পিতৃভ্যঃ স্বাভরাম্যহম্। অস্মিন্ সীদন্তু যে নান্দীমুখাঃ পিতরঃ সোম্যা পিতৃপিতামহপ্রপিতামহাশ্চানুগৈঃ সহ। ইতি পূর্ব্বাগ্রান্ কুশান্ পাতয়িত্বা পিণ্ডস্থানত্রয়ে। ওঁ শুন্ধন্তাং নান্দী-

মুখ্যো মাতরঃ। ওঁ শুন্ধন্তাং নান্দীমুখ্যঃ পিতামহ্যঃ। ওঁ শুন্ধন্তাং নান্দীমুখ্যঃ প্রপিতামহ্যঃ। এবং ওঁ শুন্ধন্তাং নান্দীমুখাঃ পিতর। ওঁ শুন্ধন্তাং নান্দীমুখাঃ পিতামহাঃ। ওঁ শুন্ধন্তাং নান্দীমুখাঃ প্রপিতামহাঃ। এবং মাতামহপক্ষেঽপি। ইত্যবনেজয়েৎ। ততো হুতশেষমিশ্রিতান্ দধিবদরাজ্যমিশ্রিতাংশ্চ পিণ্ডান্ অষ্টাদশপরিমিতাংশ্চ কৃত্বা একৈকং পিণ্ডং গৃহীত্বা দেবতীর্থেন পূর্ব্বাভি-মুখীভূয় একস্য দ্বৌ দ্বৌ পিণ্ডৌ নির্বপেৎ। ওঁ অমুক গোত্রে নান্দীমুখি মারতমুকী দেবি এষ তে পিণ্ডো যে হত্র ত্বামত্রানু তে নমঃ। ওঁ অমুক গোত্রায়ৈ নান্দীমুখ্যৈ মাত্রে অমুকী দেবৈ্য অয়ং পিণ্ডো নমঃ। এবং অপর পিণ্ডমেকং দদ্যাৎ। এবং পিতা-মহাদিভ্যঃ পিণ্ডান্ দদ্যাৎ। ততঃ পিণ্ডান্তিকে পিণ্ডশেষং বিকীরেৎ। ওঁ লেপভুজো নান্দীমুখাঃ পিতরঃ প্রীয়ন্তাং ইতি কুশমূলে হস্তং প্রোঞ্চ্য ততোঽত্র নান্দীমুখাঃ পিতরো মাদয়ধ্বম্। যথাভাগমাবৃষাধ্বং ইত্যনুমন্ত্রয়েৎ। ততঃ প্রদক্ষিণমুদগা-বৃত্য প্রাণানাযম্য ওঁ অমীমদন্ত নান্দীমুখাঃ পিতরো যথাভাগমাবৃষায়িষত। পুনস্তাননুমন্ত্র্য চরুশেষমাঘ্রায় ওঁ শুন্ধন্তাং নান্দী-মুখ্যো মাতরঃ। ইত্যাদিভির্মন্ত্রৈঃ পূর্ব্ববৎ প্রত্যবনেজয়েৎ। ততোঽঞ্জনাভ্যঞ্জনে দদ্যাৎ। ওঁ অমুক গোত্রে নান্দীমুখি মাতরমুকী-দেবি অঙ্ক্ষ্ব তত্তে যে হত্র ত্বামত্রানু নমঃ ইত্যঞ্জনং দদ্যাৎ। ওঁ অমুক গোত্রে নান্দীমুখি মাতরমুকী দেবি অঙ্ক্ষ্ব তত্তে যে হত্র ত্বামত্রানু নমঃ। ইতি ঘৃতং দদ্যাৎ। তত এতদ্বো নান্দীমুখাঃ পিতরো বাসঃ। ইতি প্রতিপিণ্ডেষু দশাং দদ্যাৎ। সর্ব্বত্র এতদ্বো নান্দীমুখাঃ পিতরো বাসঃ। পিতামহাদীনামূহো ন কর্ত্তব্যঃ। ওঁ অমুক গোত্রে নান্দীমুখি মাতরমুকী দেবি এতত্তে বাসো যে হত্র ত্বামত্রানু নমঃ। এবং পিতামহাদিভ্যো দদ্যাৎ। ততঃ পিণ্ডান্ তুষ্ণীং গন্ধাদিভিঃ সংপূজ্য। ষড়ঞ্জলীন্ দর্শ-

য়েৎ। ওঁ নমো বো নান্দীমুখাঃ পিতরঃ ঊশে। নমো বো নান্দীমুখাঃ পিতরো রসায়। পুস্টা বো নান্দীমুখাঃ পিতরঃ শুস্মায়। নমো বো নান্দীমুখাঃ পিতরো ঘোরায়। নমো বো নান্দীমুখাঃ পিতরো জীবায়। নমো বো নান্দীমুখাঃ পিতরো রসায়। পুস্টা বো নান্দীমুখাঃ পিতরো নম। এতা যুস্মাকং নান্দীমুখাঃ পিতর। ইমা অস্মাকং জীবা বো জীবন্তু ইহ সন্তঃ স্যাম। ততঃ পিণ্ডপাত্রমূর্দ্ধমুখং কৃত্বা ওঁ মনোন্বাহ্বামহে নারাশংসেন স্তোমেন পিতৃণাঞ্চ মন্মভিঃ। ওঁ আন এতু মনঃ পুনঃ ক্রত্বে দক্ষায় জীবসে জ্যোকচ সূর্য্যং দৃশে। পুনর্নঃ পিতরো মনো দদাতু দৈব্যোজনঃ। জীবং ব্রাতং সচেমহি। মনঃ স্বতীভিঃ। তন্তুমতীং তন্তুং তন্বং ব্রজন্নিতি। ইত্যৃচা পিণ্ডস্থান্ পিতৄনুপতিষ্ঠেৎ॥ ওঁ পরেতে নান্দীমুখাঃ পিতরঃ সোম্যাসো গম্ভীরৈঃ পথিভিঃ পূর্ব্বিণেভির্দত্তাস্মভ্যং দ্রবিণেহ ভদ্রং রয়িঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত। ইতি মন্ত্রেণ পিণ্ডস্থান্ পিতৄন্ প্রবাহয়েৎ। 
অগ্নিদগ্ধাঃ। ততো ভুক্তশেষাদন্নাৎ কিঞ্চিদানীয় সজলং কৃত্বা উচ্ছিষ্টসমীপে ভুক্তবতাং ব্রাহ্মণানাং সমীপে বিকীরেৎ। ওঁ অসোমপাশ্চ যে দেবা যজ্ঞভাগবিবর্জিতাঃ। তেষামন্নং প্রদাস্যামি বিকিরং বৈশ্বদেবিকম্। ওঁ অসংস্কৃতপ্রণীতা যে ত্যাগিন্যো যাঃ কুলস্ত্রিয়ঃ। দাস্যামি তেভ্যো বিকিরমন্নং তাভ্যশ্চ পৈতৃকম্। এবং মাতামহপক্ষেঽপি। বিষ্ণুপক্ষে ওঁ অসংশয়ো ভবেদ্বিষ্ণুর্মোক্ষসাধনমব্যয়ম্। পিতৃণাঞ্চ পরং শ্রেষ্ঠং বিকীরান্নঞ্চ বৈষ্ণবম্। তত্র মন্ত্রঃ। সর্ব্ববর্ণিকমন্নাদ্যমানীয়াপ্লাব্য বারিণা। সমুৎসৃজেৎ ভুক্তবতাং মধ্যতো বিকীরেদ্ভুবি। ততো বিপ্রহস্তে শুদ্ধোদকং দত্ত্বা ওঁ বসুসত্যসংজ্ঞকা বিশ্বে দেবা ভবৎপ্রসাদেনাস্মদ্গোত্রং বর্দ্ধতাম্। ইতি বদেৎ। ওঁ স্বস্তি বর্দ্ধতাং গোত্রং ইত্যুত্তরম্। এবং মাত্রাদীনামপি বদেৎ ততো ভুক্তং

চালয়েৎ। ততো দৈবাদিক্রমেণ স্বস্তি ভবন্তো ব্রুতঃ ওঁ স্বস্তি ইত্যুত্তরম্। ততো বিশ্বদেবপক্ষে বিপ্রহস্তে ঽক্ষতং দত্ত্বা ওঁ অদ্যে-
ত্যাদি বসুসত্যসংজ্ঞকানাং বিশ্বেষাং দেবানাং আভ্যুদয়িক শ্রাদ্ধে ঽস্মিন্ যদ্দত্তমন্নপানাদিকমক্ষয্যমস্তু। ওঁ অস্তু ইত্যুত্তরম্। এবং
মাত্রাদিপক্ষে। বিষ্ণুপক্ষে ঽক্ষতং দত্ত্বা ওঁ অদ্যেত্যাদি আভ্যুদয়িক শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণোঃ আভ্যুদয়িক শ্রাদ্ধে ঽস্মিন্ যদন্ন
পানাদিকমক্ষয্যমস্তু। ওঁ অস্তু ইত্যুত্তরম্। ততো দক্ষিণা। আদৌ মাত্রাদিপক্ষে। ওঁ অদ্যেত্যাদি অমুক গোত্রাণাং নান্দী-
মুখীনাং মাতৃপিতামহীপ্রপিতামহীনাং কৃতৈতৎ আভ্যুদয়িক শ্রাদ্ধকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণাং দ্রাক্ষামবলকমূলমূল্যং যবমূল্যং
বা যথাসম্ভব দেবগোত্রশাখানাম্নে ব্রাহ্মণায়াহং সম্প্রদদে। এবং পিতৃপক্ষে। মাতামহপক্ষে বিশ্বদেবপক্ষেঽপি। বিষ্ণুপক্ষে ওঁ
অদ্যেত্যাদি শ্রাদ্ধরক্ষকস্য শ্রী মহাবিষ্ণোরাভ্যুদয়িক শ্রাদ্ধকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণাং কাঞ্চনমূল্যং যথাসম্ভব ইত্যাদি। অনয়া দক্ষিণয়া 
শ্রাদ্ধকর্ম্মেদং সদক্ষিণমস্তু। ওঁ অস্তু ইতি প্রতিবচনম্। ততো দেবতাভ্যঃ পঠেৎ। ওঁ পুষ্টিং বাচয়িষ্যে। ওঁ বাচয় ইত্যুত্তরম্।
অর্ঘ্যসম্বন্ধি পবিত্র ত্রয়মানীয় স্বস্বপিণ্ডস্থানে ওঁ নান্দীমুখীভ্যো মাতৃভ্যঃ পুষ্টিরুচ্যতাং ইতি সজলং মাতৃপবিত্রং পূর্ব্বাগ্রং ভূমৌ
ক্ষিপেৎ। অস্তু ওঁ পুষ্টিঃ। এবং পিতামহীপ্রপিতামহীভ্যঃ। এবং পিতৃপক্ষে মাতামহপক্ষেঽপি। ওঁ বসুসত্যসংজ্ঞকা বিশ্বে
দেবাঃ প্রীয়ন্তাম্। ওঁ অমুক গোত্রা নান্দীমুখ্যো মাতরঃ প্রীয়ন্তাম্। এবং পিতামহীপ্রপিতামহ্যৌ। এবং পিতৃপক্ষে মাতামহ-
পক্ষেঽপি। বিষ্ণুপক্ষে ওঁ শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণুঃ প্রীণাতু। ততঃ ওঁ আ মা বাজস্য প্রসবো জগম্যা দে মে দ্যাবাপৃথিবী
বিশ্বরূপে। আ মা গন্তাং পিতরা মাতরা চা মা সোমে ঽমৃতত্বায় গম্যাৎ। ইতি মন্ত্রেণ জলধারয়া ব্রাহ্মণান্ প্রদক্ষিণং কুর্য্যাৎ।

ততঃ পুষ্পং গৃহীত্বা ওঁ আশিষো মে প্রদীয়ন্তাম্। ওঁ আশিষঃ প্রতিগৃহ্যন্তাম্। ওঁ দাতারো নোঽভিবর্দ্ধন্তাং বেদাঃ সন্ততি-
রেব চ। শ্রদ্ধা চ নো মা ব্যাগমদ্বহু দেয়ঞ্চ নোঽস্ত্বিতি। অন্নঞ্চ নো বহু ভবেদতিথীংশ্চ লভেমহি। যাচিতারশ্চ নঃ সন্তু
মা চ যাচিস্ম কঞ্চন। অন্নং প্রবর্দ্ধতাং নিত্যং দাতা শতং জীবতু। যেভ্যঃ সঙ্কল্পিতা দ্বিজাস্তেষামক্ষয়া তৃপ্তিরস্তু। পিতৃ-
বরপ্রসাদোঽস্তু। এতাঃ সত্যাশিষঃ সন্তু। ইতি স্বশিরসি পুষ্প দদ্যাৎ। ততো নমস্কারঃ। ওঁ বসুসত্যসংজ্ঞকেভ্যো বিশ্বেভ্যো
দেবেভ্যো নমঃ। অস্মন্মাতৃপিতামহীপ্রপিতামহীচরণেভ্যো নমঃ। অস্মৎপিতৃপিতামহপ্রপিতামহচরণেভ্যো নমঃ। অস্মন্মাতামহ-
প্রমাতামহবৃদ্ধপ্রমাতামহচরণেভ্যো নমঃ। শ্রাদ্ধরক্ষক শ্রী মহাবিষ্ণবে নমঃ। কৃতাঞ্জলিঃ। ওঁ স্বাদুসংসদো নান্দীমুখাঃ পিতরো
বয়োধাঃ কৃচ্ছ্রেশ্রিতঃ শক্তিমন্তো গভীরাঃ। চিত্রসেনা ইষুবলা অমৃধ্রাঃ শতোবীরাঃ উরবো ব্রাতসাহা ব্রাহ্মণাসো নান্দীমুখাঃ
পিতরঃ সোম্যাসঃ শিবে নো দ্যাবাপৃথিবী অনেহসা। ওঁ পূষানঃ পাতু দুরিতা দৃতাবৃধো রক্ষামাকর্ণো অঘশংস ঈশত। ওঁ
সুপর্ণং বস্তে মৃগোঽস্যা দন্তো গোভিঃ সন্নদ্ধাঃ পততি প্রসূতাঃ। যত্রানরঃ শঙ্করিচ দ্রবন্তে তত্রাস্মভ্যমিষবঃ শর্ম্ম শংসত। ওঁ
ইহৈবস্তং মাবিয়োষ্টং বিশ্বমায়ুর্ব্যশ্চুতম্। ক্রীড়ন্তৌ পুত্রৈর্নপ্তৃভির্মোদমানৌ স্বগৃহে। সর্ব্বস্যাপ্তৈ সর্ব্বস্য জিত্যৈ সর্ব্ব.মব
তেনাপ্নোতি সর্ব্বং জয়তি। ওঁ মন্ত্রার্থাঃ সিদ্ধয়ঃ সন্তু পূর্ণাঃ সন্তু মনোরথাঃ। শত্রূণাং বুদ্ধিনাশোঽস্তু মিত্রাণামুদয়ো মম।
ইতি প্রার্থয়েৎ। ততঃ ওঁ বাজে বাজেঽবত বাজিনো নো ধনেষু বিপ্রা অমৃতা ঋতজ্ঞাঃ। অস্য মধ্বঃ পিবত মাদয়ধ্বং
তৃপ্তা যাত পথিভির্দেবযানৈঃ। ইতি কুশাগ্রেণ পিতৄন্ বিসর্জ্জয়েৎ। কুশমূলে পশ্চাদ্দৈবং বিসর্জ্জয়েৎ। অদ্য মে সফলং জন্ম

ভবৎপাদাভিবন্দনাৎ। অদ্য মে বংশজাঃ সর্ব্বে যাতা বোঽনুগ্রহাদ্দিবম্। পত্রকাশাদিদানেন ক্লেশিতা যূয়মীদৃশাঃ। তৎক্লেশজাতচিত্তস্তু বিস্মৃত্য ক্ষন্তুমর্হত। ততঃ পাত্রসমর্পণম্। যেষাং শ্রাদ্ধং কৃতং তেষামক্ষয়াবৈ তৃপ্তয়ে ইদং পাত্রীয় দ্রব্যং আপোনারায়ণে সমর্পিতম্। শ্রাদ্ধং সাঙ্গং জাতং ইতি পৃচ্ছেৎ। বেদবিধিনা সাঙ্গং জাতমেব প্রত্যুত্তরম্। ততোঽচ্ছিদ্রাবধারণম্। কুশগ্রন্থিমোচনম্। দীপাচ্ছাদনম্। সূর্য্যনমস্কারঃ। বামদেব্যগানম্। শেষান্নং জ্ঞাতিভিঃ সহ ভুঞ্জীত ॥ * ॥ * ॥

॥ * ॥ ইতি নান্দীমুখশ্রাদ্ধং সমাপ্তং ॥ * ॥

মহাবামদেব্যঋষির্বিরাড়্‌গায়ত্রীচ্ছন্দ ইন্দ্রো দেবতা শান্তিকর্ম্মণি জপে বিনিয়োগঃ। ওঁ কয়া নশ্চিত্র আভুবদূতী সদা বৃধঃ সখা কয়া সচিষ্ঠয়া বৃতা। কস্ত্বা সত্যো মদানাং মংহিষ্ঠো মৎসদন্ধসঃ। দৃঢ়া চিদারুজে বসু। অভীষুণঃ সখীনামবিতা জরীতৄণাং শতং ভবাস্যূতয়ে। ওঁ স্বস্তি ন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তি নঃ পূষা বিশ্ববেদাঃ স্বস্তি নস্তার্ক্ষ্যোঽরিষ্টনেমিঃ স্বস্তি নো বৃহস্পতির্দধাতু। ওঁ দ্যৌঃ শান্তিরন্তরীক্ষং শান্তিঃ পৃথিবী শান্তিরাপঃ শান্তিরোষধয়ঃ শান্তির্বনস্পতয়ঃ শান্তির্বিশ্বে দেবাঃ শান্তির্ব্রহ্ম শান্তিঃ শান্তিরেবঃ শান্তিঃ সামা শান্তিরেধি। আয়ুষ্যমগ্রং যশসা শুভা চ ধর্ম্মার্থকামো বহুপুত্রতা চ। শত্রুক্ষয়ো রাজ্যসুপূজিতত্বং সর্ব্বে গ্রহাঃ শান্তিকরা ভবন্তু। শুভমস্তু শিবঞ্চাস্তু মহালক্ষ্মীঃ প্রসীদতু। রক্ষন্তু ত্বাং সদা দেবাঃ সর্ব্বাঃ সন্তু চ সম্পদঃ ॥ * ॥ * ॥

ওঁ নমো গণেশায়। অথ ঋগ্বেদিনাং স্বস্তিসূক্তম্। ওঁ স্বস্তি নো মিমীতামশ্বিনা ভগঃ স্বস্তি দেব্যেদিতে রনর্বণঃ। স্বস্তি পূষা অসুরো দধাতু নঃ স্বস্তি দ্যাবাপৃথিবী সুচেতুনা। স্বস্তয়ে বায়ুমুপব্রুবামহৈ সোমং স্বস্তি ভুবনস্য যস্পতিঃ। বৃহস্পতিং সর্বগণং স্বস্তয় আদিত্যাসো ভবন্তু নঃ বিশ্বে দেবা নো হদ্যাঃ স্বস্তয়ে বৈশ্বানরো হসুয়গ্নিঃ স্বস্তয়ে। দেবা অবন্তু ভবঃ স্বস্তয়ে স্বস্তি নো রুদ্রঃ পাত্বংহসঃ। স্বস্তি মিত্রাবরুণা স্বস্তি পথ্যে রেবতী। স্বস্তি ন ইন্দ্রশ্চাগ্নিশ্চ স্বস্তি নো হদিতে কৃধি। স্বস্তি পন্থামনুচরেম সূর্য্যাচন্দ্রমসাবিব। পুনর্দ্দদতা ঘ্নতা সঙ্গমেমহি স্বস্ত্যয়নং তার্ক্ষ্যমরিস্টনেমির্মহদ্ভুতং রায়সং দেবতানাম্। অসুরঘ্নমিন্দ্রসখং সমৎসু বৃহদযশো নাবমিবারুহেম। অংহোমুচমাঙ্গিরসং গয়ঞ্চ স্বস্ত্যাত্রেয়ং মনসা চ তার্ক্ষ্যং প্রয়তপাণিঃ শরণং প্রপদ্যে স্বস্তি সংবাধেষভয়ং নো হস্তু॥ * ॥ * ॥ * ॥ * ॥ ১১৫

অথ বসুধারামন্ত্রঃ। ওঁ শতধারং বায়ুমর্কং স্বর্বিদং নৃচক্ষসস্তে অভিচক্ষতে হবিঃ। যে প্রণন্তি প্রচয়িচ্ছন্তি সঙ্গমেতে দক্ষিণাং দুহতে সপ্তমাতরম্॥ * ॥ * ॥ * ॥ * ॥

অগ্নিস্তু মারুতো নাম গর্ভাধানে বিধীয়তে। পুংসবনে চান্দ্রমসঃ শুঙ্গাকর্ম্মণি শোভনঃ। সীমন্তে মঙ্গলো নাম প্রগল্ভো জাতকর্ম্মণি। পার্থিবো নামকরণে প্রাশনে চ শুচিস্তথা। সত্যনামা চ চূড়ায়াং ব্রতাদেশে সমুদ্ভবঃ। গোদানে সূর্য্যনামা চ বিবাহে যোজকঃ স্মৃতঃ। চতুর্থ্যাং শিখিনামা বৈ ধৃতাবগ্নিস্তথাপরঃ॥ * ॥ * ॥ * ॥

গর্ভাধানে চ ধান্যানি ফলং পুংসবনে তথা। সীমন্তোন্নয়নে চাজ্যং কাঞ্চনং জাতকর্ম্মণি। বাসসী নামকরণে তাম্রপাত্রম্ নিষ্ক্রমে। প্রাশনে কাংস্যপাত্রন্তু বৃষভং ক্ষুরকর্ম্মণি। সুবর্ণন্তু ব্রতাদেশে বিবাহে গৌঃ পয়স্বিনী। দক্ষিণাঃ কথিতা হ্যেতা অন্যত্র গুরুতুষ্টয়ে ॥ * ॥ * ॥ * ॥ * ॥ * ॥

গৌরী পদ্মা শচী মেধা সাবিত্রী বিজয়া জয়া দেবসেনা স্বধা স্বাহা শান্তিঃ পুষ্টির্ধৃতিঃ ক্ষমা। আত্মদেবতা কুলদেবতা চ মাতরঃ ষোড়শঃ স্মৃতাঃ ॥ ইতি প্রত্যেকং পাদ্যাদিভিঃ পূজয়েৎ ॥ * ॥ * ॥ * ॥

চূড়াকরণ সামগ্রী। ব্রীহিযব মাষতিল পূর্ণশরাব ৪, তাম্রক্ষুর, লৌহক্ষুর, শীতোষ্ণোদকশরাব ২, অনডুহগোময়পূর্ণশরাব ২, নবনীত, তদভাবে দধিশর। দধি পূর্ণপাত্র, শমীপত্র, কুশপিঞ্জলী ২৭, সমিধ, আজ্য ॥ * ॥ * ॥ ১২৮

অথোপনয়ন সামগ্রী। নূতন বস্ত্র যোড় ২, কৃষ্ণসারচর্ম্ম, যজ্ঞোপবীত ২, মঞ্জুমেখলা বৈণবদণ্ড, তদভাবে পলাশদণ্ড স্থালী চরুপ্রোক্ষণভাজন, শ্রুব, শ্রুচ্, চর্ব্বর্থতণ্ডুল, একমূলপলাশ, তদভাবে কুশস্তম্ব, ব্রীহিযবমাসতিলপূর্ণশরাব ৪, তাম্রক্ষুর, লৌহক্ষুর, অনডুহগোময়, শমীপত্র, শীতোদকপূর্ণশরাব ২, নবনীত, দধি, কুণ্ডলদ্বয়, ছত্র, উপানহযুগল, করঞ্জবীজ, পিষ্ট, পুষ্পচন্দনাদি ॥ * ॥

ওঁ নমো ভগবতে বসুদেবায়। চতুর্বদনসদ্মস্থ চতুর্ব্বেদকুটুম্বিনে। দ্বিজানুষ্ঠেয় সর্ব্বকর্ম্মসাক্ষিণে ব্রহ্মণে নমঃ। সিদ্ধিঃ সর্ব্বস্য কার্য্যস্য ভক্তানাং যৎপ্রসাদতঃ। সম্পনীপদ্যতে দেবঃ শঙ্করঃ শঙ্করোতু নঃ। আশ্বলায়নগৃহ্যোক্তবিধিনা পদ্ধতিং শুভাম্। বাসুদেবো বিতনুতে বিশারদ মহেশ্বরঃ॥ * ॥ * ॥ * ॥ * ॥

অথ ঋগ্বেদিনাং দশকর্ম্মপদ্ধতির্লিখ্যতে। অথ কর্ত্তা নিবর্ত্তিতনিত্যকৃত্যঃ প্রাঙ্মুখ উপবিশ্য আচম্য প্রাণায়ামত্রয়ং বিধায় স্বস্তিবাচ্য সঙ্কল্প চতুর্দিক্ষু ইষু প্রমাণাং স্থণ্ডিলং নির্ম্মায় গোময়েনোপলিপ্য সমিধা কুশমূলেন বা ষড়্রেখা উল্লিখেৎ। অগ্নিস্থাপনপশ্চিমেদেশে একা প্রাদেশসম্মিতা উদগগ্রা, তস্যা আদ্যন্ত দেশে অসংস্পৃষ্টে প্রাদেশমাত্রে দ্বে রেখে মধ্যে তিস্রঃ অসংহতাঃ। উল্লেখকং স্থণ্ডিলে নিধায় তা অভিরভ্যুক্ষ্য উল্লেখকং স্থণ্ডিলান্নিরস্য আচম্য চ কাংস্যেন খর্পরান্তরেণ বা বহ্নিমানীয় জ্বলতৃণং নিরস্যতি। প্রজাপতির্ঋষিরনুষ্টুপ্ছন্দোঽগ্নির্দেবতা অগ্নিসংস্কারে বিনিয়োগঃ। ওঁ ক্রব্যাদমগ্নিং প্রহিণোমি দূরং যমরাজ্যং গচ্ছতু রিপ্রবাহঃ। ইতি জ্বলতৃণং দক্ষিণপশ্চিম দিশি প্রক্ষিপেৎ। অপস্পৃশ্য প্রজাপতির্ঋষিরনুষ্টুপ্ছন্দো বৃহস্পতির্দেবতা অগ্নিপ্রতিষ্ঠাপনে বিনিয়োগঃ। ওঁ ভূর্ভুবঃ স্বঃ। ইত্যাত্মনো হভিমুখং বহ্নিং প্রতিষ্ঠাপয়েৎ। ততো হগ্নিং প্রজ্বাল্য ধ্যায়েৎ। ওঁ ইহৈবায়মিতরো জাতবেদা দেবেভ্যো হব্যং বহতু প্রজানন্। অস্মিন্নেব সময়ে অগ্নের্নামকরণম্। ওঁ অগ্নে ত্বং অমুক নামাসি। ততঃ পাতিতদক্ষিণজানুঃ প্রাদেশসম্মিতা আজ্যাক্তাস্তিস্রঃ সমিধো গৃহীত্বা তূষ্ণীমগ্নৌ ক্ষিপেৎ। ওঁ অদ্যেত্যাদি অমুকাখ্যকর্ম্মণি তদঙ্গমন্বাধানং চাহঙ্করিষ্যে তত্র চ দেবতাপরিগ্রহার্থং অস্মিন্নন্বাহিতে হগ্নৌ অগ্নিং জাতবেদস-

মিশ্রেন প্রজাপতিং চাঘারদেবতে আজ্যেমাগ্নীনোমৌ চক্ষুষী আজ্যেনাগ্নিং পবমানং প্রজাপতিঞ্চ। এতাঃ প্রধানদেবতাঃ চরু দ্রব্যেণ অনুযাজসন্নহনাভ্যাং রুদ্রং পশুপতিং চরুশেষেণ স্বিষ্টকৃতং হুতশেষেণ অগ্নিময়সং দেবান্ বিষ্ণুমগ্নিং বায়ুং সূর্য্যং প্রজাপতিঞ্চ সর্ব্বপ্রায়শ্চিত্তদেবতা আজ্যেন বিশ্বান্দেবান্ সংস্রবেণ সাঙ্গেন কর্ম্মণা সদ্যোঽহং যক্ষ্যে। ইত্যুচার্য্য ব্যাহৃতিভিরন্বাধায় ঐশানীমারভ্য উত্তর দিশং যাবৎ ত্রিস্তৃণীং পরিস্তরণং কুশানামুদগ্রং পূর্ব্বাগ্রং বা ত্রিঃ প্রোক্ষণঞ্চ। অগ্নেঃ পূর্ব্বত আরভ্য দক্ষিণাদিক্রমেণ উত্তরদিশং যাবৎ সোদকেন পাণিনা ত্রিঃ প্রোক্ষণং কার্য্যমিতি পরিসমূহনম্। ততঃ পুনরপি পূর্ব্বত আরভ্য দক্ষিণাদিক্রমেণ উত্তরদিশং যাবদগ্নেঃ পর্য্যুক্ষণং কার্য্যং তথা হোমীয় দ্রব্যমপি। ততো ঽগ্নেরুত্তরদিশ্যুপবিশ্য ব্রহ্মণো দক্ষিণহস্তাঙ্গুষ্ঠমালভ্য ওঁ অদ্যেত্যাদি মৎকর্ত্তব্যামুককর্ম্মণি কৃতাকৃতাবেক্ষক রূপব্রহ্মত্বেনামুক গোত্রমমুক প্রবরং শ্রী অমুক দেবশর্ম্মাণং ত্বামহং বৃণে। ওঁ বৃতোঽস্মীতি প্রত্যুত্তরম্। ততো ঽগ্নেঃ পূর্ব্বেণানীয় দক্ষিণদিশি প্রাগাস্তীর্ণবিষ্টরকুশং ব্রহ্মাসনমুপকল্প্য প্রাঙ্মুখীস্তিষ্ঠন্ ওঁ অহে দৈধিষিতব্যোদত-স্তিষ্ঠান্যস্য সদনে সীদ যোঽস্মৎপাকতর ইত্যুচ্চার্য্য বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং ব্রহ্মসনাদ্দর্ভমেকং গৃহীত্বা নৈর্ঋত্যাং দিশি প্রক্ষি-পেদনেন মন্ত্রেণ। প্রজাপতিঋষির্গায়ত্রীচ্ছন্দো ঽগ্নির্দেবতা তৃণনিরসনে বিনিয়োগঃ। ওঁ নিরস্তঃ পরাবসুরিতি তৃণং নিরস্য অপ উপস্পৃশ্য ব্রহ্মোপবেশনং কুর্য্যাৎ। ওঁ ইদমহমর্বাগ্বসোঃ সদনে সীদ। সীদামীতি প্রত্যুত্তরম্। ব্রহ্মাণমুত্তরাভিমুখমুপবেশ্য স্পৃষ্ট্বা জপেদিমং মন্ত্রম্। প্রজাপতিঋষির্গায়ত্রীচ্ছন্দো বিষ্ণুর্দেবতা জপে বিনিয়োগঃ। ওঁ বৃহস্পতির্ব্রহ্মা ব্রহ্মসদন আশি-ষ্যতে বৃহস্পতে যজ্ঞং গোপায় স যজ্ঞং পাহি স যজ্ঞপতিং পাহি স মাং পাহি ভূর্ভুবঃ স্বর্বৃহস্পতিপ্রসূত। ততঃ পাত্রাসাদনং উত্তরাগ্রেষু

কুশেষু কুর্য্যাৎ। যথা চরুহোমে পবিত্রচ্ছেদনাস্ত্রয়ো দর্ভাঃ দ্বে পবিত্রে প্রণীতাপ্রোক্ষণ্যৌ স্রুক্স্রুবৌ ইধ্মাবর্হিষি সন্মার্জ্জন-কুশাঃ ষট্ উপযমনকুশাঃ সপ্ত শূর্পং কৃষ্ণাজিনং উদূখলমুষলে আজ্যং তণ্ডুলাঃ মেক্ষণং কমণ্ডলুঃ পুষ্পচন্দনাদীনি পূর্ণপাত্র-ঞ্চাসাদয়েৎ। আজ্যহোমে তু স্রুক্শূর্পকৃষ্ণাজিনমেক্ষণোদূখলমুষলানি ত্যক্ত্বাসাদয়েৎ। তদ্যথা প্রোক্ষণীপাত্রং বারুণং দ্বাদশাঙ্গুল-দীর্ঘং করতলসম্মিতখাতং পদ্মপত্রাকৃতিম্ আজ্যস্থালীং তৈজসীং মৃণ্ময়ীং বা। চরুস্থালীঞ্চ। স্রুবং খাদিরং হস্তমাত্রং অঙ্গুষ্ঠপর্ব্ব-মাত্রখাতং বর্ত্তুলমুখম্। স্রুচং খাদিরং হস্তমাত্রং হস্তাকৃতিম্। শূর্পং নলময়ং হস্তমাত্রবিস্তীর্ণম্। ইধ্মং অরত্ন্যায়ামং দ্বিপ্রা-দেশপ্রমাণম্বা একবিংশতিদারুকং পঞ্চদশারুকম্বা পালাশং খাদিরং বাটম্বা। বর্হিঃ কুশমুষ্টিস্বরূপম্। ইধ্মবন্ধনীং রজ্জুং ঊর্দ্ধ-স্থিতেন বামপাণিনা অধঃস্থিতেন দক্ষিণপাণিনা সব্যাবৃতাং ত্রিগুণাং কৃত্বা তয়া সকৃদ্বেষ্টিতং উদগগ্রমাত্মনোঽগ্রতঃ বর্হিঃসমেতং স্থাপ-য়েৎ। অথ পূর্ব্বাসাদিতকুশপত্রত্রয়ং গৃহীত্বা দ্বে পবিত্রে প্রাদেশমাত্রে সাগ্রে যথা স্যাতাং তথা মূলপ্রদেশে ছিনত্তি। ততঃ সর্ব্বাণি পাত্রাণি পবিত্রাভ্যাং ক্রমেণ উদকমাদায় প্রোক্ষতি। তদুত্তরে প্রণীতপাত্রং নিধায় ততঃ পবিত্রে প্রোক্ষণীপাত্রে নিধায় তত্র জলং পুষ্পাণি চ প্রক্ষিপ্য গন্ধপুষ্পজলপূর্ণং সপবিত্রং প্রোক্ষণীপাত্রং বামহস্তোপরি নিধায় দক্ষিণেনাচ্ছাদ্য ওঁ ব্রহ্মন্নপঃ প্রণে-ষ্যামি ইতি পৃষ্টো ব্রহ্মা ওঁ প্রণয় ইতি ব্রূয়াৎ। ততঃ কর্ত্তা ওঁ ভূর্ভুবস্বর্বৃহস্পতিপ্রসূত ইতি জপিত্বা স্বনাসিকাসমীপং নীত্বা প্রণীতায়োর্মধ্যে নিদধাতি ততো দর্ভৈরাচ্ছাদয়েৎ। তদেব পূর্ণপাত্রমুচ্যতে। ততঃ শূর্পে পূর্ণপাত্রস্থ পবিত্রে নিধায় তত্র ব্রীহি মুষ্টীন্নির্ব্বপতি। ওঁ অগ্নয়ে ত্বা জুষ্টং গৃহ্ণামি ইতি গৃহীত্বা ওঁ অগ্নয়ে ত্বা জুষ্টং নির্ব্বপামি ইতি শূর্পে নির্ব্বপিত্বা ওঁ অগ্নয়ে ত্বা

জুষ্টং প্রোক্ষামি ইত্যভ্যুক্ষ্য এবং ক্রমেণ ওঁ অগ্নীষোমাভ্যাং ত্বা জুষ্টং তূষ্ণীং মুষ্টিদ্বয়ং নির্ব্বপতি। ততঃ পূর্ব্বগ্রীবোত্তরলোমকৃষ্ণা-জিনে উদূখলং নিধায় তত্র শূর্পোপস্থব্রীহীন্ প্রক্ষিপ্য পত্নী স্বয়ং বা মুষলেনাবহন্তি শূর্পেণ নিস্তুষতি। ততো নিস্তুষান্ শুক্লীকৃতান্ তণ্ডুলান্ ত্রিঃ প্রক্ষাল্য দুগ্ধং দত্ত্বা চরুস্থাল্যাং পচেৎ। ততঃ শূর্পস্থপবিত্রে আজ্যস্থাল্যাং নিধায় তত্রৈবাজ্যমাসিচ্য অগ্নে রুত্তরতোঽঙ্গারানানীয় তত্রৈবাজ্যস্থালীমধিসৃত্য অধিসৃতং ঘৃতং দ্রবীকৃত্য তত্র দর্ভাগ্রদ্বয়ং ত্রিঃক্ষিপ্য জ্বলত্তৃণমাজ্যোপরি ত্রির্ভ্রাময়িত্বা অঙ্গারাস্তূতসংস্পর্শেনৈব আজ্যস্থালীমধিশ্রিতি। আজ্যস্থে পবিত্রে অসংহতে অঙ্গুষ্ঠোপকনিষ্ঠাভ্যামুত্তানপাণিভ্যাং গৃহীত্বা সবিতুষ্ট্বেতি মন্ত্রস্য হিরণ্যস্তূপঋষিঃ উষ্ণিক্ছন্দঃ সবিতা দেবতা আজ্যোৎপবনে বিনিয়োগঃ। ওঁ সবিতুষ্ট্বা প্রসব উৎপুনাম্যচ্ছিদ্রেণ পবিত্রেণ বসোঃ সূর্য্যস্য রশ্মিভিঃ। ইতি ঘৃতমুৎপূয় পশ্চাৎ দ্বিস্তূষ্ণীং উৎপূয় কৃতাজ্যোৎপবনভ্যাং ঘৃতং প্রোক্ষেৎ পবিত্রেঽনলে ক্ষিপেৎ। প্রাগাসাদিতকুশমুষ্টিং প্রত্যগাস্তীর্য্য তত্রাজ্যপাত্রং নিদধাতি। ততঃ শ্রুবং স্রুচং অধোমুখং বহ্নৌ প্রতপ্য স্রুচং ভূমৌ নিধায় শ্রুবং বামহস্তে কৃত্বা সম্মার্জ্জনকুশাগ্রৈঃ শ্রুবমূলারভ্য বিলপর্য্যন্তং সংমৃজ্য পুনঃ প্রতপ্য সংমার্জ্জনকুশমূলৈর্বিলমারভ্যাধস্তান্ মূলপর্য্যন্তং ত্রিঃ সংমৃজ্য প্রণীতোদকেন পবিত্রাভ্যাং ত্রিঃ প্রোক্ষ্য পুনঃ প্রতপ্য ঘৃতাদুত্তরতো বর্হিষি নিদধাতি। ততঃ স্রুচমাদায় শ্রুববৎসংস্কারং কৃত্বা ঘৃতাদুত্তরতো বর্হিষি নিদধাতি। তান্ কুশান্ সংপ্রোক্ষ্য বহ্নৌ ক্ষিপেৎ। ততশ্চরুং ঘৃতেন সংস্পৃশ্য উত্থাপ্যাজ্যাগ্ন্যোর্মধ্যেন নীত্বা আজ্যস্য দক্ষিণস্যাং দিশি বর্হিষি নিদধাতি। ততঃ কৃতাঞ্জলিঃ বিশ্বানিল ইত্যৃচো মাধ্যমাত্রেয়ো বসুশ্রুতঋষির্জাতবেদোঽগ্নির্দেবতা ত্রিষ্টুপ্ছন্দোঽগ্ন্যলঙ্কারে বিনিয়োগঃ। ওঁ বিশ্বানিলো

দুর্গহা জাতবেদঃ সিন্ধুং ন নাবা দুরিতাতিপর্ষি। অগ্নে অত্রিবন্নমসা গৃণানোঽস্মাকং বোধ্যবিতা তনূনাম্। যস্ত্বা হৃদা কীরি-
ণা মন্যমানো মর্ত্যং মর্ত্যো যোহবীমি জাতবেদো যশোঽস্মাসু ধেহি প্রজাভিরগ্নে অমৃতত্ত্বমশ্যাম্। যস্মৈ ত্বং সুকৃতে জাতবেদ উ
লোকমগ্নে কৃণবস্যোনং অশ্বিনং সপুত্রিণং বীরবন্তং গোমন্তং রয়ীং নসতে স্বস্তি। ইতি মন্ত্রাভ্যাং বহ্নিমলঙ্কৃত্য উত্থায় আজ্যে-
নেয়ং মূলতোঽগ্রতশ্চ সংস্পৃশ্যাদায় অনন্ত ইতি মন্ত্রস্য বামদেবঋষির্জাতবেদোঽগ্নির্দেবতা ত্রিষ্টুপ্ছন্দ ইধ্মাধানে বিনিয়োগঃ।
ওঁ অয়ন্ত ইধ্ম আত্মা জাতবেদস্তেনেধ্যস্ব বর্দ্ধস্ব চেদ্ধ বর্দ্ধয় চাস্মান্ প্রজয়া পশুভির্ব্রহ্মবর্চসে নান্নাদ্যেন সমেধয় স্বাহা। ইদ-
মগ্নয়ে জাতবেদসে নমঃ। ইতীধ্মমাধায় শ্রুবেণাজ্যং গৃহীত্বা বায়বীং দিশমারভ্য আগ্নেয়ীং যাবৎ ঘৃতধারাং দদ্যাৎ। ওঁ প্রজা-
পতয়ে স্বাহা। ইদং প্রজাপতয়ে নমঃ। সর্ব্বত্র শ্রুবলগ্ন হবিঃশেষং প্রোক্ষণীপাত্রে স্থাপয়েৎ। ততো নৈঋত কোণাদারভ্য ২০১
ঈশানকোণপর্য্যন্তং ঘৃতধারাং দদ্যাৎ। ওঁ প্রজাপতয়ে স্বাহা। ইদং প্রজাপতয়ে নমঃ। এতাবাঘারৌ ভাবিতৌ। উপবিশ্য
ততোঽগ্নের্দক্ষিণে পশ্চিমান্তাৎ পূর্ব্বান্তং যাবৎ ঘৃতধারাং দদ্যাৎ। ওঁ অগ্নয়ে স্বাহা। ইদমগ্নয়ে নমঃ। ইত্যগ্নের্দক্ষিণং
লোচনং স্পষ্টং ভাবয়েৎ। ততোঽগ্নেরুত্তরে পশ্চিমান্তাৎ পূর্ব্বান্তং যাবৎ ঘৃতধারাং দদ্যাৎ। ওঁ সোমায় নমঃ। ইত্যগ্নের্বামলো-
চনং স্পষ্টং ভাবয়েৎ। এতাবাজ্যভাগৌ ভাবিতৌ। ততঃ প্রকৃত হোমঃ। ততশ্চরোরর্দ্ধমুদ্ধৃত্য ইদমগ্নয়ে ইদমগ্নীষোমাভ্যাং
ইতি বিভজ্য রেখাং করোতি। ততঃ শ্রুবেণ দর্ব্যাং আজ্যং নিধায় চরৌ চ ঘৃতশ্রুবং দত্ত্বা মেক্ষণেনচরুমধ্যাদঙ্গুষ্ঠপর্ব্ব-
মাত্রং চরুং বারদ্বয়ং গৃহীত্বা তদুপরি ঘৃতশ্রুবং দত্ত্বা চরুপাত্রস্থং চরুঞ্চাভিঘারয়েৎ। ইত্যবদানধর্ম্মেণ গৃহীত্বা ওঁ অগ্নয়ে স্বাহা।

ইদমগ্নয়ে নমঃ ইতি বহ্নের্ম্মধ্যে প্রাগুদগ্বা জুহোতি। পুনরবদানধর্ম্মেণ চরুং গৃহীত্বা ওঁ অগ্নীষোমাভ্যাং স্বাহা। ইদমগ্নীষো-
মাভ্যাং নমঃ ইতি মন্ত্রেণ বহ্নেঃ প্রাগুদগ্বা জুহোতি। ততঃ যদস্যেতি মন্ত্রস্য হিরণ্যগর্ভঋষিঃ স্বিষ্টকৃদগ্নির্দ্দেবতা প্রকৃতিচ্ছন্দঃ
স্বিষ্টকৃদ্ধোমে বিনিয়োগঃ। ওঁ যদস্য কর্ম্মণোঽত্যরীরিচং যদ্বা ন্যূনমিহাকরম্। অগ্নিষ্টৎস্বিষ্টকৃদ্বিদ্বান্ সর্ব্বং স্বিষ্টং সুহুতং
করোতু মে। অগ্নয়ে স্বিষ্টকৃতে সুহুতহুতে সর্ব্বপ্রায়শ্চিত্তাহুতীনাং কামানাং সমর্দ্ধয়িত্রে সর্ব্বান্নঃ কামান্ সমর্দ্ধয় স্বাহা। ইদ-
মগ্নয়ে স্বিষ্টকৃতে নমঃ। প্রাগুদগ্বা জুহোতি। ততঃ ইধ্মবন্ধনীং রজ্জুং বিস্রংস্য শ্রুবস্রুচোর্লেপং প্রোক্ষ্য ওঁ রুদ্রায় স্বাহা।
ইত্যনুযাজং বহ্নৌ ক্ষিপেৎ পরিস্তরণানি চ ততঃ প্রায়শ্চিত্তানি চ। জুহুয়াৎ। অয়াশ্চেত্যস্য বিমদঋষিরয়োঽগ্নির্দ্দেবতা পঙ্ক্তি-
চ্ছন্দঃ প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ অয়াশ্চাগ্নে স্যনভিশস্তিপাশ্চ সত্যমিত্ত্বময়া অসি। অয়সা বয়না কৃতো যাসং হব্যমোহিষে 
অয়া নো ধেহি ভেষজং স্বাহা। ইদময়সে নমঃ॥ ১ ॥ অতো দেবা ইতি মন্ত্রস্য মেধাতিথির্ঋষির্গায়ত্রীচ্ছন্দঃ প্রায়শ্চিত্তহোমে
বিনিয়োগঃ। ওঁ অতো দেবা অবন্তু নো যতো বিষ্ণুর্ব্বিচক্রমে। পৃথিব্যাঃ সপ্তধামভিঃ স্বাহা। ইদং দেবেভ্যো নমঃ॥ ২ ॥
ইদং বিষ্ণুরিতি মন্ত্রস্য মেধাতিথির্ঋষির্বিষ্ণুর্দ্দেবতা গায়ত্রীচ্ছন্দঃ প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা
নিদধে পদম্ সমূঢ়মস্য পাংশুলে স্বাহা। ইদং বিষ্ণবে নমঃ॥ ৩॥ ব্যাহৃতীনাং পরমেষ্ঠীপ্রজাপতির্ঋষিরগ্নির্বায়ু সূর্য্যাঃ প্রজাপতি-
র্দ্দেবতা দৈবী গায়ত্রী দৈব্যুষ্ণিক্ দৈব্যনুষ্টুপ্ দৈবী বৃহতী চ্ছন্দাংসি প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। ইদমগ্নয়ে নমঃ॥ ৪॥
ওঁ ভুবঃ স্বাহা। ইদং বায়বে নমঃ॥ ৫॥ ওঁ স্বঃ স্বাহা। ইদং সূর্য্যায় নমঃ॥ ৬॥ ওঁ ভূর্ভুবঃ স্বঃ স্বাহা। ইদং প্রজাপতয়ে

নমঃ ॥ ৭ ॥ অথ প্রায়শ্চিত্তহোমঃ। ওঁ বিশ্বেভ্য দেবেভ্যো স্বাহা। ইতি সংশ্রাবং হুত্বা অনাজ্ঞাতমিতি দ্বাভ্যাং হিরণ্যগর্ভ-
ঋষিরগ্নির্দেবতা অনুষ্টুপ্‌ছন্দঃ জ্ঞাতাজ্ঞাতদোষহরণার্থং হোমে বিনিয়োগঃ। ওঁ অনাজ্ঞাতং যদজ্ঞাতং যজ্ঞস্য ক্রিয়তে মিথঃ।
অগ্নে তদস্য কল্পয় ত্বং হি বেত্থ যথাযথং স্বাহা। ইদমগ্নয়ে নমঃ। ওঁ পুরুষসম্মিতো যজ্ঞো যজ্ঞঃ পুরুষসম্মিতঃ। অগ্নে
তদস্য কল্পয় ত্বং হি বেত্থ যথাযথং স্বাহা। ইদমগ্নয়ে নমঃ। যৎপাকত্রেতি সুতনুর্ঋষিরগ্নির্দেবতা ত্রিষ্টুপ্‌ছন্দঃ প্রায়শ্চিত্তহোমে
বিনিয়োগঃ। ওঁ যৎপাকত্রা মনসা দীনদক্ষা যজ্ঞস্য মন্নুতে মর্ত্যা সঃ। অগ্নিষ্টদ্ধোতা ক্রতুবিদ্ধি জানন্যজিষ্ঠো দেবং ঋতুশো
যজাতি স্বাহা। ইদমগ্নয়ে নমঃ কর্ম্মান্তরিতকর্ম্মবিপর্য্যাসকর্ম্মবিলোপপ্রায়শ্চিত্তার্থং ত্বন্নোঽগ্নে সত্বন্নোঽগ্নে ইতি দ্বাভ্যাং হোমেয্য।
ওঁ ত্বন্নোঽগ্নে বরুণস্য বিদ্বান্ দেবস্য হেলোঽবয়াসি সীষ্ঠা। যজিষ্ঠো বহ্নিতমঃ শোশুচানো বিশ্বান্ দ্বেষাংসি প্রমুমুগ্ধ্যস্মৎ স্বাহা। 
ইদমগ্নীবরুণাভ্যাং নমঃ। ওঁ স ত্বন্নোঽগ্নে বমো ভবোতী নে দিষ্টো অস্যা উষসো ব্যুষ্টৌ। অবযক্ষ্মণো বরুণং ররাণো
বীহি মৃলীকং সুহবো ন এধি স্বাহা। ইদমগ্নীবরুণাভ্যাং নমঃ। স্বরাক্ষরপদব্রুতবর্ণলোপপ্রায়শ্চিত্তার্থং যদ্বো দেবা ইতি
হোমেয্য। ওঁ যদ্বো দেবাশ্চ কৃমজিহ্বয়া গুরুমনসো বা প্রস্মৃতী দেবহেলনং অরাবায়ো যে অতি দুচ্ছুনীয়তে তস্মিন্
তদেনা বসবো নিধেতন স্বাহা। ইদমগ্নয়ে নমঃ। আসীনো বর্হিষি পূর্ণপাত্রং নিধায়াদ্ভিরাপূর্য্যাভিমৃষ্য জপতি। উত্থায় পূর্ণা-
হুতিঃ। ধামন্তে ইতি বামদেবঋষিরাপো দেবতা জগতীচ্ছন্দঃ পূর্ণাহুতিহোমে বিনিয়োগঃ। ওঁ ধামন্তে বিশ্বং ভুবনমধিশ্রিতমন্তঃ
সমুদ্রে হৃদ্যন্তরায়ুষি অপামনীকে সমিথেয় আভৃতস্তমশ্যাম মধুমন্তন্ত উর্ম্মিং স্বাহা। ইতি ঘৃতপুষ্পফলযুতাং পূর্ণাহুতিং দদ্যাৎ।

ততো দক্ষিণাদানং ব্রহ্মণে। অদ্যেত্যাদি অমুক কর্ম্মণি কৃতাকৃতাবেক্ষণরূপব্রহ্মকর্ম্ম প্রতিষ্ঠার্থং দক্ষিণাং পূর্ণপাত্রমিদং প্রজাপতি দৈবতং অমুকশর্ম্মণে তুভ্যং দাতুং সমুৎসৃজে। অনাদেশেত্বিদং আদেশে তু যথাদিষ্টং তদ্দৈবতং উচ্চার্য্য দেয়ম্। ততঃ পূর্ণ-পাত্রং বর্হিষি নিধায় ওঁ দেবযবস ঋষিরাপো দেবতা ত্রিষ্টুপ্ছন্দো মার্জ্জনে বিনিয়োগঃ। ওঁ আপো অস্মান্মাতরঃ শুন্ধয়ন্তু ঘৃতেন নো ঘৃতপূঃ পুনন্তু বিশ্বং হি রিপ্রং প্রবহন্তি দেবীরুদিতাভ্যঃ শুচিরাপূত এমি। সিন্ধুদ্বীপঋষিরাপো দেবতা মার্জ্জনে বিনিয়োগঃ। ওঁ ইদমাপঃ প্রবহত যৎ কিঞ্চিৎ দুরিতং ময়ি যদ্বাহমভিদুদ্রোহ যদ্বা শেফ উতানৃতম্। নারায়ণঋষিরাপো দেবতা ত্রিষ্টুপ্ছন্দো মার্জ্জনে বিনিয়োগঃ। ওঁ সুমিত্রিয়া ন আপ ওষধয়ঃ সন্তু দুর্ম্মিত্রিযাস্তস্মৈ সন্তু যোঽস্মান্ দ্বেষ্টি যঞ্চ বয়ং দ্বিষ্মঃ॥ ইতি ত্রিভির্ম্মন্ত্রৈরন্যৈঃ যজমানো বঃ মার্জ্জনং কুর্য্যাৎ॥ পুংসবনাদৌ তু পত্ন্যা অপি মার্জ্জনং কার্য্যম্। কর্ম্মান্তে পরিসমূহন পর্য্যুক্ষণে কুর্য্যাৎ। হুতশিষ্টন্তু ঘৃতং ব্রহ্মণে তদভাবে ব্রাহ্মণায় প্রদীয়তে। দশযাগে তু অগ্নীসোমাভ্যাং পদস্থানে ইন্দ্রাগ্নিভ্যাং ইতি বদেৎ। অন্যৎ সর্ব্বং সমমেতদন্তং নোপবাদিবিষ্যতে। প্রধানদেবতান্যত্বে সদ্যা কালস্তথেষ্যতে। ইতি স্থালীপাকঃ। স্বস্তি বাচনমন্ত্রেষ্টং গৃহ্যকর্ম্মসু কেষুচিৎ। আচার্য্যেণাপি শাস্ত্রেঽস্মিন্ মঙ্গলার্থমুদীরিতং। ইতি নারায়ণঃ। স্বস্তিবাচনমন্ত্রেষ্টং সর্ব্বে-ষাম্বৃদ্ধিকর্ম্মণাং। আদাবন্তে প্রয়োক্তব্যমিতি যজ্ঞবিদাং মতং। জয়ন্তু স্বামিনং প্রোক্তমিদন্তু স্বস্তির্বাচনমিতি গৃহ্যকারিকাকৃৎ॥ * ॥

॥ * ॥ ইতি বাসুদেববিরচিতাশ্বলায়নপদ্ধতৌ সাধারণহোম প্রয়োগ ॥ * ॥

অথ বিবাহহোমপ্রয়োগঃ ॥ * ॥ তত্রোত্তরায়ণে মাঘ ফাল্গুন বৈশাখ জ্যৈষ্ঠাষাঢ়ান্যতমেষু মাসেষু। সিংহস্থমকরস্থগুরু-রহিতেষু দ্বিতীয়াপঞ্চমীসপ্তম্যেকাদশীদ্বাদশীত্রয়োদশীপৌর্ণমাস্যন্যতমেষু তিথিষু। গুরুশুক্রেন্দ্বন্যতমেষু বারেষু। প্রাজাপত্যসোম-দৈবতহস্তস্বাতিমিত্রামহির্ব্ধ্নপৌষ্ণবিশ্বেদেবান্যতমেষু ভেষু। বিষ্ট্যনন্তরবড়ন্যতমেষু করেণষু। কন্যা তুলা মিথুনান্যতমেষু। শুক্লপক্ষে প্রতিনির্বর্ত্তিতনিত্যকৃত্যঃ পিতা মাতৃপূজাপূর্ব্বকমাভ্যুদয়িকং বিদধীত। আহতবস্ত্রধরোঽলঙ্কৃতঃ সিতচ্ছত্রঃ জ্ঞাতিবান্ধবন্নতো বরো বেদঘোষমঙ্গলগীতবাদ্যপুরঃসরো বধূগৃহং গচ্ছেৎ। বধূশ্চ সুগন্ধসর্ব্বৌষধিভিঃ সুস্নাতা মঙ্গল্যে প্রতীক্ষন্তী তিষ্ঠেৎ। বধূপিতা নির্ব্বর্ত্তিতাভ্যুদয়িকো মণ্ডপদ্বারমাগতং বরমভ্যুত্থানাদিভিঃ সন্তোষ্য বরঃ প্রাঙ্মুখঃ দাতা প্রত্যঙ্মুখ উপবিশেৎ। আচান্তঃ দাতা ওঁ সাধু ভবানাস্তাম্। বরঃ ওঁ সাধ্বহমাসে দাতা ওঁ অর্চ্চয়িষ্যামো ভবন্তম্। বরঃ ওঁ অর্চ্চয়। বধূপিতা সামান্যং পাদ্যাদিকং দত্ত্বা 
বরং বৃণুয়াৎ। ওঁ অদ্যেত্যাদি অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্রং এবং পৌত্রং এবং পুত্রং অমুক গোত্রং অমুক প্রবরং শ্রী অমুক দেবশর্ম্মাণং অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্র্যাঃ এবং পৌত্র্যাঃ এবং পুত্র্যাঃ অমুক গোত্রায়া অমুক প্রবরায়াঃ শ্রীঅমুকী দেব্যাঃ অমুক বিবাহায় বরত্বেন ভবন্তমহং বৃণে। ইতি জামাতুর্দক্ষিণং জানু সাক্ষতেন দক্ষিণপাণিনা ধৃত্বা বদেৎ। ওঁ বৃতোঽস্মীতি বরঃ। দাতা ওঁ যথাবিহিতং বরকর্ম্ম কুরু। বরঃ ওঁ যথাজ্ঞানং করবাণি। ততো গ্রামধর্ম্মং স্ত্র্যাচারঞ্চ কুর্য্যাৎ। ততো মণ্ডপমাগত্য বরঃ প্রাঙ্মুখ উপবিশেৎ। ততো দাতা প্রত্যঙ্মুখঃ ওঁ বিষ্টরো বিষ্টরো বিষ্টরঃ প্রতিগৃহ্যতাং ইত্যুক্ত্বা বিষ্টরমর্পয়তি। ততো বরঃ ওঁ বিষ্টরং প্রতিগৃহ্ণামি ইত্যুক্ত্বা ওঁ অহং বর্ষ্মসঃ জাতানাং বিদ্যুতামিব সূর্য্যঃ।

ইযন্তুমধিতিষ্ঠামি যো মাকশ্চাভিদাসতি। ইতি মন্ত্রেণাসনে উত্তরাগ্রং বিষ্টরমুপবিশেৎ। ততঃ পূর্ব্ববদ্বিষ্টরং গৃহীত্বা পাদাভ্যাং
পদা বা বিষ্টরমুত্তরাগ্রমতিক্রম্যোপবিশেৎ। ততো দাতা সজলপাত্রমাদায় ওঁ পাদ্যাঃ পাদ্যাঃ পাদ্যাঃ প্রতিগৃহ্যন্তামিত্যর্পয়তি।
বরঃ ওঁ পাদ্যং প্রতিগৃহ্লামীত্যুক্ত্বা পাত্রং ভূমৌ নিধায় প্রথমং দক্ষিণ পাদং প্রক্ষালয়েৎ। ওঁ দক্ষিণং পাদমবনেনিজেঽস্মিন্
রাষ্ট্রে ইন্দ্রিয়ং দদামি। ইতি মন্ত্রেণ দক্ষিণং পাদং প্রক্ষালয়েৎ। ওঁ সব্যং পাদমবনেনিজে ঽস্মিন্ রাষ্ট্রে শ্রিয়মাবেশয়ামি।
ইতি মন্ত্রেণ সব্যম্। ততো দাতা গন্ধপুষ্পদূর্ব্বাক্ষতযুক্তং জলং শঙ্খে কৃত্বা ওঁ অয়ন্তে অর্ঘ্যোঽর্ঘ্যোঽর্ঘ্যঃ প্রতিগৃহ্যতাম্। ততো
বরঃ ওঁ অর্ঘ্যং প্রতিগৃহ্লামি ইতি গৃহীত্বা ওঁ অর্চ্চত প্রিয়মেধাসো অর্চ্চত অর্চ্চন্তু পুত্রকা উত পূর্ণধৃষ্ণ্বর্চ্চত। ওঁ অর্চ্চন্তুস্ত্বা হবামহে
অর্চ্চন্তঃ সমিধীমহি অগ্নে অর্চ্চস্ব উতয়ে। ইতি মন্ত্রাভ্যাং অর্ঘ্যং শিরসি দদ্যাৎ। ততো দাতা সজল পাত্রমানীয় ওঁ ইদন্তে
আচমনীয়মাচমনীয়মাচমনীয়ং প্রতিগৃহ্যতাম্। বরঃ ওঁ আচমনীয়ং প্রতিগৃহ্লামি ইত্যুক্ত্বা ওঁ অমৃতোপস্তরণমসি স্বাহা ইতি প্রা-
শ্নাতি। ততো ঽন্যোদকেন শুদ্ধ্যর্থমাচামেৎ। এবমন্যত্রাপি শুদ্ধ্যর্থমাচমনীয়ার্থ নিবেদিতাদন্যাদেব জলং গ্রাহ্যম্। ততো দাতা
কাংস্যপাত্রস্থং মধুপর্কং অন্য কাংস্যপাত্রাচ্ছাদিতং গৃহীত্বা ওঁ অয়ন্তে মধুপর্কো মধুপর্কো মধুপর্কঃ প্রতিগৃহ্যতাম্। বরঃ ওঁ মধুপর্কং প্রতি-
গৃহ্লামি ইত্যুক্ত্বা উদ্ঘাটিতমীক্ষেৎ। ওঁ মিত্রস্য ত্বা চক্ষুষা প্রতীক্ষে ইতি সমীক্ষে। ওঁ দেবস্য ত্বা সবিতুঃ প্রসবে ঽশ্বিনো-
র্বাহুভ্যাং পুষ্ণো হস্তাভ্যাং প্রতিগৃহ্লামি ইত্যনেন গৃহ্নীয়াৎ। ততস্তং সব্যে পাণৌ কৃত্বা ওঁ মধুবাতা ইত্যৃচা বীক্ষ্য
অঙ্গুষ্ঠোপকনিষ্ঠাভ্যাং ত্রিঃ প্রদক্ষিণমালোড়য়েদ্বরঃ। ততঃ ওঁ বসবস্ত্বা গায়ত্রেণ ছন্দসা ভক্ষয়ন্তু ইতি প্রাচ্যামঙ্গুলিগতলে-

পশুমুপনয়তি। পুনস্তাভ্যামেব গৃহীত্বা ওঁ রুদ্রস্ত্বা ত্রৈষ্টুভেন ছন্দসা ভক্ষয়ন্তু ইতি দক্ষিণঃ। ওঁ আদিত্যাস্ত্বা জাগতেন ছন্দসা
ভক্ষয়ন্তু ইতি পশ্চিমতঃ। ওঁ বিশ্বে দেবস্ত্বা অনুষ্টুভেন ছন্দসা ভক্ষয়ন্তু ইতি উত্তরতঃ। ওঁ ভূতেভ্যস্ত্বামুৎক্ষিপামি ইতি মধ্যা-
ত্রিরুদ্ধৃত্য উর্দ্ধং ক্ষিপেৎ। কর্ম্মারম্ভৌ মন্ত্রাবৃত্তিঃ। ততো ভূমৌ পাত্রং নিধায় অঙ্গুষ্ঠোপকনিষ্ঠাভ্যামেব গৃহীত্বা ওঁ বিরাজো
দোহোঽসি ইতি মন্ত্রেণ প্রথমং প্রাশ্নাতি। অন্যোদকেনাচম্য পুনরন্যং কুশাদিকং গৃহীত্বা ওঁ বিরাজো দোহমসি ইতি দ্বিতীয়ম্
ওঁ ময়ি দোহঃ পাদ্যায়ৈ বিরাজ ইতি তৃতীয়ম্। সর্ব্বত্রং তৃপ্তিং ন গচ্ছেৎ। অবশিষ্টন্তু শিষ্যায় দাতব্যং তদভাবে সর্ব্বমপ্সু
নিক্ষিপেৎ। অথ আচামতি। ওঁ অমৃতাপিধানমসি স্বাহা ইতি। ওঁ রৌরবে পুণ্যনিলয়ে পদ্মার্বদনিবাসিনাম্। অর্থিনামুদকং
সিতামক্ষয্যমুপতিষ্ঠতু। ইতি পূর্ব্বনিবেদিতাচমনীয়ং প্রাশ্নাতি প্রথমম্। ওঁ সত্যং যশঃ শ্রীর্ময়ি শ্রী শ্রয়তাং ইতি দ্বিতীয়ম্। ২০৭
ততঃ আচান্তায় বরায় বদ্ধাং গাং অয়ন্তে গৌর্গৌরিত্যন্যো নির্দ্দিশেৎ। বরঃ ওঁ মোচয়ধ্বং ইতি বদেৎ। ততো বরঃ মাতা
রুদ্রেতি ভার্গবো জমদগ্নি ঋষির্গৌর্দেবতা ত্রিষ্টুপ্ছন্দঃ গোমোচনে বিনিয়োগঃ। ওঁ মাতা রুদ্রাণাং দুহিতা বসূনাং স্বসাদিত্যা-
নামমৃতস্য নাভিঃ। প্রণুবোচং চিকিতুষে জনায় মা গা মনাগামদিতুং বধিষ্ঠ ইতি পঠেৎ। ততঃ প্রৈষ্যং প্রতি সৃজত গাং ইত্যু-
চ্চৈস্ত্রেয়াদ্বরঃ। ইতি মধুপর্কঃ। ততো মুখচন্দ্রিকাং বিধায় গ্রামধর্ম্মান্ জনপদধর্ম্মাংশ্চ স্ত্রিয়ো যৎ কারয়ন্তি তৎ কুর্য্যাৎ। অথ
কন্যাদানম্। বরঃ প্রাঙ্মুখ উপবিশ্য ওঁ স্বস্তি নো মিমীতেতি স্বস্তিসূক্তং পঠিত্বা ধর্ম্মপ্রজাসম্পত্ত্যর্থং পাণিগ্রহণং করিষ্যে
ইতি সঙ্কল্প্য অগ্নিস্থাপনং কুর্য্যাৎ। বরঃ প্রাঙ্মুখ উপবিশ্য সর্ব্বত ইষুমাত্রাবরং স্থণ্ডিলং নির্ম্মায় গোময়েনোপলিপ্য সমিধা

কুশমূলেন বা যড়্রেখা উল্লিখেৎ। অগ্নিস্থাপনপশ্চিমদেশে একা প্রাদেশসম্মিতা উদগগ্রা তস্যা আদ্যন্তদেশেঽসংস্পৃষ্টে পূর্ব্ববৎ প্রাগগ্রে দ্বে রেখে মধ্যে তিস্রঃ। উল্লেখকং স্থণ্ডিলে নিধায় তা অদ্ভিরভ্যুক্ষ্য উল্লেখকং স্থণ্ডিলান্নিরস্যাচম্য কাংস্যখর্পরান্যতরেণ বহ্নিমানীয় জ্বলত্তৃণং নিরস্যতি। প্রজাপতির্ঋষিস্ত্রিষ্টুপ্‌ছন্দঃ অগ্নির্দেবতা অগ্নিসংস্কারে বিনিয়োগঃ। ওঁ ক্রব্যাদমগ্নিং প্রহিণোমি দূরং যমরাজ্যং গচ্ছতু রিপ্রবাহ ইতি দক্ষিণপশ্চিমকোণে প্রক্ষিপেৎ। ততঃ প্রজাপতির্ঋষিস্ত্রিষ্টুপ্‌ছন্দো বৃহস্পতির্দ্দেবতা অগ্নিপ্রতিষ্ঠাপনে বিনিয়োগঃ। ওঁ ভূর্ভুবঃস্বরিত্যত্মেনোঽভিমুখং বহ্নিং প্রতিষ্ঠাপয়েৎ। ততোঽগ্নিং প্রজ্বাল্য ধ্যায়েৎ। ওঁ ইহৈবায়মিতরো জাতবেদা দেবেভ্যো হব্যং বহতু প্রজানন্। অগ্নে ত্বং যোজকনামাসি ইতি নাম কৃত্বা পূজয়েৎ। এতদন্তং প্রকুর্ব্বীত হোম্যান্ যঃ স্থাপিতে হনলে। ততো জামাতা মঙ্গলৌষধিলিপ্তহস্তোপরি কন্যায়া দক্ষিণহস্তং নিদধ্যাৎ। ততঃ সৌভাগ্যপতিপুত্রবতী নারী মঙ্গলধ্বনিপূর্ব্বকং কুশেন বধ্নাতি। ততঃ কন্যাপিতা পশ্চিমাভিমুখঃ কুশতিলতুলসীপত্রসহিতমুদকং গৃহীত্বা কন্যায়া বামাংশং বামহস্তেন ধৃত্বা উৎসৃজেৎ। অস্মৈ সবস্ত্রাদৈ সালঙ্কারায়ৈ নমঃ ইতি ত্রিঃ সম্পূজ্য এতৎ সম্প্রদানীয়ায় বরায় নমঃ। এতদধিপতয়ে প্রজাপতয়ে নমঃ। এতেভ্য এতে গন্ধপুষ্পে নমঃ। ওঁ বিষ্ণুঃ। ওঁ তৎসদদ্যেত্যাদি অমুক গোত্রঃ শ্রী অমুক দেবশর্ম্মা ব্রহ্মলোকজিগীষাকামো বিষ্ণুপ্রীতিকামো বা অমুক গোত্রাস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্রায় এবং পৌত্রায় এবং পুত্রায় অমুক গোত্রায় অমুক প্রবরায় শ্রী অমুক দেবশর্ম্মণে ব্রাহ্মণায় বরায় অর্চ্চিতায়, অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্রীং এবং পৌত্রীং এবং পুত্রীং অমুক গোত্রাং অমুক প্রবরাং শ্রী অমুকী দেবীং এবং ত্রিরুচ্চার্য্য এনাং কন্যাং সবস্ত্রাং সাল-

স্কারাং প্রজাপতিদেবতাকাং ধর্ম্মপ্রজাসম্পত্ত্যর্থং ভার্য্যাত্বেন তুভ্যমহং সম্প্রদদে। ইতি কন্যামুৎসৃজ্য দদ্যাৎ। ততঃ কন্যেয়ং প্রজাপতিদেবতাকা ইতি বদেৎ। ততো বরঃ ওঁ স্বস্তি ইত্যুক্তা গায়ত্রীং জপিত্বা ওঁ দ্যৌস্ত্বা দদাতু পৃথিবী ত্বা প্রতিগৃহ্ণাতু ইতি পঠেৎ। ততঃ কন্যাং স্পৃশন্ কামস্তুতিং পঠেৎ। ওঁ ক ইদং কস্মা অদাৎ কামঃ কামায়াদাৎ কামো দাতা কামঃ প্রতিগৃহীতা কামঃ সমুদ্রমাবিশৎ কামেন ত্বা প্রতিগৃহ্ণামি কামৈতত্তে বৃষ্টিরসি। ইতি পঠেৎ। অঘোরচক্ষুরপতিঘ্নেতীত্যস্য সাবিত্রীসূর্য্যা ঋষিঃ সূর্য্যাসাবিত্রী দেবতা অনুষ্টুপ্‌ছন্দঃ কন্যাভিস্পর্শে বিনিয়োগঃ। ওঁ অঘোরচক্ষুরপতিঘ্নেতি শিবা পশুভ্যঃ সুমনাঃ সুবর্চ্চাঃ। বীরসূর্দ্দেবকামা স্যোনা শং নো ভব দ্বিপদেশং চতুষ্পদে। ইত্যনেন কন্যাং স্পৃশেৎ। অথ দাতা ধর্ম্মে চার্থে চ কামে চ নাতিচরিতব্যা ত্বয়েতি বদেৎ। নাতিচরামীতি বরঃ। যস্ত্বয়া কর্ত্তব্যঃ সো হনয়া সহ। তথা চরামীতি বরঃ। ততঃ কন্যাদান প্রতিষ্ঠার্থং সুবর্ণং গোমিথুনং বা দক্ষিণাং দদ্যাৎ। ততো দক্ষিণাঃ পান্তু বহু দেয়ঞ্চ নোহস্তু প্রজাপতিঃ প্রীয়তাম্। তিথিকরণ মুহূর্ত্তগ্রহলগ্নসম্পদঃ সন্তু পুণ্যাহং ইতি ত্রিঃ। ততঃ কন্যাবাসসী গৃহীত্বা সখীগৃহং প্রবেশয়েৎ। ততো গ্রামধর্ম্মান্ জনপদধর্ম্মাংশ্চ স্ত্রিয়ো যৎ কারয়ন্তি তৎ কর্ত্তব্যম্। গ্রামবচনঞ্চ কুর্য্যুরিতি বচনাৎ ইতি সম্প্রদানম্। অথ মন্ত্রবন্তঃ সুহৃদঃ সমেতাঃ। বরো বা জলপূর্ণকলসমাদায় ওঁ অনাধৃষ্টমিত্যাদি মন্ত্রেণ তানভিমৃষ্য ওঁ অনাধৃষ্টমস্যনাধৃষ্যং দেবানামোজোহভিশস্তিপাঃ। অনভিশস্ত্যঞ্জসা সত্যমুপগেষংস্বিতে মাধাঃ। ওঁ যৎ কক্ষীবাং সংলবনং পুত্রোহঙ্গিরসামবেত্তিনা। নোহদ্য বিশ্বে দেবাঃ সংপ্রিয়ন্তাং সমবীরণাম্। আ নঃ প্রজাং জনয়তু রাজর্ষায় সমমক্তুর্য্যম্যা। অভ্রাতৃঘ্নীঃ পতিলোকমাবিশ শন্নো ভব দ্বিপদেশং

চতুষ্পদে। ওঁ ইমাং ত্বমিন্দ্রমীঢ্বঃ সুপুত্রাং সুভগাং কৃণু দশাস্যাং পুত্রমাধেহি পতিমেকাদশং কৃধি। সম্রাজ্ঞী শ্বশুরে ভব
সম্রাজ্ঞী শ্বশ্র্বাং ভব। ননান্দরি সম্রাজ্ঞী ভব সম্রাজ্ঞী অধিদেবৃষু। ওঁ সমুদ্রজ্যেষ্ঠাৎ সলিলস্য মধ্যাৎ পুনানায়ং ত্যনিবিশ-
মানাঃ। ইন্দ্রো যা বজ্রী বৃষভো ররাদ তা আপো দেবীরিহ মামবন্তু। ওঁ যা আপো দিব্যা উত বা স্রবন্তি খনিত্রিমা উত বা
যাঃ স্বয়ং যাঃ। সমুদ্রার্থা যাং শুচয়ঃ পাবকাস্তা আপো দেবীরিহ মামবন্তু। ওঁ যাসাং রাজা বরুণো যাতি মধ্যে সত্যা-
নৃতে অবপশ্যন্ জনানাম্। মধুশ্চ্যুতঃ শুচয়ো যাঃ পাবকাস্তা আপো দেবীরিহ মামবন্তু। ওঁ যাসু রাজা বরুণো যাসু সোমো বিশ্বে-
দেবা যাসূর্জ্জং মদনন্তি। বৈশ্বানরো যাস্বগ্নিঃ প্রবিষ্টস্তা আপো দেবীরিহ মামবন্তু। আপোহিষ্টা ময়ো ভুবস্তা ন ঊর্জ্জে দধা-
তন। মহেরণায় চক্ষসে। যো বঃ শিবতমো রসস্তস্য ভাজয়তেহ নঃ উশতীরিব মাতরঃ। তস্মা অরঙ্গমাম বো যস্য ক্ষয়ায়
জিন্বথ। আপো জনয়থা চ নঃ ইত্যেতৈর্মন্ত্রৈঃ কন্যামভিস্পৃশেৎ। তত ওঁ পবিত্রা গীর্বণো গির ইমা ভবন্তু বিশ্বতঃ। বৃদ্ধায়ু-
মনুবৃদ্ধয়ো জুষ্টা ভবন্তু জুষ্টয়ঃ। ইন্দ্রং বিশ্ব অবীবৃধন্ সমুদ্রস্য চ সংগিরঃ। রথীতমং রথীনাং রাজানং সৎপতিং পতিম্।
ইত্যনেন লোহিতবাসসা পরিধাপ্য কন্যামাচাময়েৎ। আজ্যমিশ্রেণ পয়সা তয়োরঞ্জলীরূপস্তীর্য্যাদ্রাক্ষতৈঃ পরিপূর্য্যান্যো অন্যয়োঃ
শিরসি অক্ষতং নিক্ষিপেৎ। ওঁ শ্রিয়ো মে কামঃ সমৃধ্যতাং যশো মে কামঃ সমৃধ্যতাং প্রজা মে কামঃ সমৃধ্যতাং পশু মে
কামঃ সমৃধ্যতাম্। এবং ত্রিঃ কৃত্বা ওঁ দশাবনিভ্যো দশকক্ষেভ্যো দশযোক্ত্রেভ্যো দশযোজনেভ্যো দশাভিষুভ্যো অর্চ্চতস্য-
বেভ্যো দশশ্রিয়ো দশযুক্তা বহদ্ভ্যঃ। ইতি মন্ত্রেণ তাং যোক্ত্রেণাবেষ্ট্য ওঁ অগ্নে বিশ্বেভিঃ স্বনীকদেবৈরূর্ণাবন্তং প্রথমঃ সীদ

যোনিম্। কুলায়িনং ঘৃতবন্তং সাবিত্রে যজ্ঞং নয় যজমানায় সাধু। ইত্যনেন কন্যাবামদক্ষিণকেশপাশমূর্ণয়া বধ্নীয়াৎ। অথ লৌকিকমাচারং বৃদ্ধোপদিষ্টমাচরিত্বা প্রতিগ্রহ স্থানাৎ। ওঁ যদেষি মনসা দূরং দিশোঽনুপবমানো বা। হিরণ্যপর্ণো বিকর্ণঃ সত্বা সম্মনসীকরোতু অমুকি দেবি ॥ * ॥ * ॥ * ॥ * ॥

অথ বিবাহহোমক্রমঃ ॥ * ॥ ব্রাহ্মার্ষদৈবপ্রাজাপত্যবিবাহেষু হোমানন্তরং পরিণয়ক্রমঃ। গান্ধর্ব্বাসুরপৈশাচরাক্ষসেষু পরিণয়ানন্তরম্। কন্যাসহিতো বরো হোমমণ্ডপং গচ্ছেৎ। আত্মনো দক্ষিণপার্শ্বে কন্যামুপবেশ্য ওঁ স্বস্তিসূক্তং পঠিত্বা প্রাণানা-যম্য ওঁ অদ্য অস্যাং মে ভার্য্যাত্বসিদ্ধ্যর্থং বিবাহহোমং করিষ্যে। দেবতাপরিগ্রহার্থং প্রজাপতিং সদসিদ্ধ্যাং ওঁ ভূর্ভুবঃ স্বঃ স্বাহা ইদং প্রজাপতয়ে নমঃ। ইতি সমিধাবগ্নাবাধায় অস্মিন্নন্বাহিতেঽগ্নৌ অগ্নিং জাতবেদসমিধ্মেন প্রজাপতিং প্রজাপতিকাঘারদেবতে আজ্যেন অগ্নিং পবমানমগ্নিং পবমানমর্য্যমণং প্রজাপতিঞ্চ এতাঃ প্রধানদেবতা আজ্যদ্রব্যেণ অর্যমণং বরুণং পূষণমেতাঃ প্রধা-নদেবতা লাজদ্রব্যেণ অগ্নিং স্বিষ্টকৃতাজ্যেন ইধ্মসংনহনেন রুদ্রং বিশ্বান্ সংস্রবেণ সর্ব্বপ্রায়শ্চিত্তদেবতা অগ্নিং দেবান্ বিষ্ণুং অগ্নিং বায়ুং সূর্য্যং প্রজাপতিঞ্চ জ্ঞাতাজ্ঞাতদোষনির্হরণার্থমনাজ্ঞাতমিতি তিস্রঃ আজ্যদ্রব্যেণ সাঙ্গেন কর্ম্মণা সদ্যোঽহং যক্ষ্যে। প্রোক্ষণীং স্রুবমাসাদ্য চমসঞ্চেতি প্রকারেণ পাত্রাসাদনং কৃত্বা অগ্নেঃ পশ্চাৎ সোপলদৃশদমৈশান্যাং দিশি পূর্ণকলসং প্রতিষ্ঠা-প্যাভ্যর্চ্চ্য উত্তরস্যাং দিশি সপ্ততণ্ডুলমুষ্টীন্ প্রাগগ্রান্ নিক্ষিপেৎ ততঃ পবিত্রকরণাদি যথান্বারব্ধো বরঃ আজ্যাধিশ্রপণান্তং কৃত্বা আজ্যেন সহ লাজানপি পর্য্যগ্নিকরণার্থং বিধায় পূর্ব্ববিধিনা স্রুবং সংমৃজ্য ইধ্মাধানাদি আঘারান্তং কৃত্বা আজ্যভাগৌ

নস্তুঃ। যোজকনামানমগ্নিং সংপূজ্য অগ্ন আয়ুংষীতি তিসৃণাং শতং বৈখানসা ঋষয়ঃ অগ্নিঃ পবমানো দেবতা গায়ত্রীচ্ছন্দঃ আজ্যহোমে বিনিয়োগঃ। ওঁ অগ্ন আয়ুংষি পবস্ব আসুবোর্জমিষঞ্চ নঃ। আরেবাধস্ব দুচ্ছুনাং স্বাহা। ইদমগ্নয়ে পবমানায় নমঃ ওঁ অগ্নির্ঋষিঃ পবমানঃ পাঞ্চজন্যঃ পুরোহিতঃ। তমীমহে মহাগয়ং স্বাহা ইদমগ্নয়ে পবমানায় নমঃ। ওঁ অগ্নয়ে পবস্ব স্বপা অস্মে বর্চ্চঃ সুবীর্য্যম্। দধদ্রয়িং ময়ি পোষং স্বাহা ইদমগ্নয়ে পবমানায় নমঃ। অর্য্যমেত্যস্য রয়ুগ্রভৃঋষির্য্যমা দেবতা ত্রিষ্টুপ্ছন্দ আজ্যহোমে বিনিয়োগঃ। ওঁ ত্বমর্য্যমা ভবসি যৎ কনীনাং নাম স্বধাবন্গুহ্যং বিভর্ষি। যুঞ্জন্তি মিত্রং স্বধিতং ন গোভির্যদ্দম্পতী সুমনসা কৃণোষি স্বাহা ইতি অর্য্যম্নে পবমানায় নমঃ। প্রজাপতে নত্বদিত্যস্য হিরণ্যগর্ভঋষিঃ প্রজাপতির্দেবতা ত্রিষ্টুপ্ছন্দ আজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে-নত্বদেতান্যন্যো বিশ্বারূপাণি পরিতা বভূব। যৎকামাস্তেজুহুমস্তন্নোহস্তু বয়ং স্যামঃ পতয়ো রয়ীণাং স্বাহা। ইদং প্রজাপতয়ে নমঃ। ইতি 
বধ্বান্বারব্ধো বরঃ পঞ্চাহুতীর্হুত্বা লজ্জাবনতাননামর্দ্ধোন্নতমুখীং কুর্য্যাৎ। ততঃ প্রাঙ্মুখ্যা উপবিষ্টায়াস্তস্যাঃ পুরস্তাদ্বরঃ প্রাঙ্মুখস্তিষ্ঠন্ উত্তানেন হস্তেন উত্তানদক্ষিণহস্তাঙ্গুলীরেব পুত্রকামো গৃহ্ণীয়াৎ। স্ত্রীকামো রোমান্তং হস্তমুত্তানম্। উভয়কামঃ সাঙ্গুষ্ঠং করম্। গৃভ্ণামীত্যস্য সূর্য্যাসাবিত্রীঋষির্ভগোর্য্যমা দেবতা ত্রিষ্টুপ্ছন্দঃ হস্তগ্রহণে বিনিয়োগঃ। ওঁ গৃভ্ণামি তে সৌভগত্বায় হস্তং ময়া পত্যা জরদষ্টির্যথাসম্। ভগোর্যমা সবিতা পুরন্ধির্মহ্যং ত্বা দুর্গার্হপত্যায় দেবাঃ। ইত্যনেন পুনস্তথৈব পূর্ব্ববদাসনে উপবিশ্য বরো বধ্বঞ্জলিমদ্ভিঃ প্রোক্ষতি। ততো বধ্বঞ্জলৌ বধূসোদর তদভাবে পিতৃব্যস্য পিতৃস্বসুর্ব্বা মাতুলস্য মাতৃস্বসুর্ব্বা পুত্রঃ ভ্রাতৃপ্রতিনিধির্ব্বা লাজান্ দ্বিরাবপতি। ততো বরঃ শূর্পগতান্ লাজান্ অঞ্জলিস্থানপি ঘৃতশ্রুবেণাভিঘার্য্যাবদান-

ধর্ম্মেণ। ওঁ অর্য্যমণং নু দেবং কন্যামগ্নিমযচ্ছত। স ইমাং দেবোঽর্য্যমা প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। ইদমর্য্যম্নে নমঃ। ইতি বরে পঠিতে পত্নী অঙ্গুলিভেদমকুর্ব্বতী অঙ্গুল্যগ্রৈর্জুহোতি। ততো বহ্নেরুদকুম্ভস্য চ দৃশদ্বর্জং ত্রিঃ প্রদক্ষিণং বধূসহিতো বরঃ করোতি। ওঁ অমোহমস্মি সা ত্বং সা ত্বমস্য মোহং দ্যোরহং পৃথিবী ত্বং তাবেব বিবহাবহৈ সহ রেতো দধাবহৈ প্রজাং প্রজনয়াবহৈ। সম্প্রেয়ৌ রোচিষ্ণু সুমনস্যমানৌ জীবেমঃ শরদঃ শতম্। ততো বরঃ উভাভ্যাং পাদাভ্যাং বধূং দৃশদমারো-হয়তি। ওঁ ইমমশ্মানমারোহাশ্মেব ত্বং স্থিরা ভব। সহস্রপৃতনা যতোঽভিতিষ্ঠ প্রতন্যতঃ। ইতি মন্ত্রেণ পুনঃ পূর্ব্বদঞ্জল্যপ-স্তরণাদিলাজারোপণান্তং কৃত্বা ওঁ বরুণং নু দেবং কন্যামগ্নিমযচ্ছতঃ। স ইমাং দেবো বরুণঃ প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। ইদং বরুণায় নমঃ। ইতি পূর্ব্ববজ্জুহোতি। পূর্ব্ববৎ প্রদক্ষিণং কৃত্বা ওঁ ইমমশ্মারোহণং পূর্ব্ববৎ করোতি। পুনঃ পূর্ব্ববৎ লাজারোপণান্তং কৃত্বা ওঁ পূষণং নু দেবং কন্যামগ্নিমযচ্ছত। স ইমাং দেবঃ পূষা প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। ইদং পুষ্ণে নমঃ। ইতি পূর্ব্ববজ্জুহোতি। পূর্ব্ববৎ প্রদক্ষিণং কৃত্বা ওঁ ইমমশ্মানমিত্যশ্মারোহণং পূর্ব্ববৎ করোতি। ততশ্চতুর্থেঽবশিষ্টান্ লাজান্ শূর্পকোণস্থান্ ওঁ প্রজাপতয়ে স্বাহা। ইদং প্রজাপতয়ে নমঃ। ইতি পঠন্নত্যর্থং জুহোতি বধূঃ। যদিগড্ডরলোম্না পূর্ব্বদক্ষিণোত্তরশিখে বদ্ধে স্যাতাং তদা তে বিস্রংসয়তি। প্রত্বা মুঞ্চামি দ্বয়োঃ সূর্য্যাসাবিত্রীঋষিঃ সূর্য্যাসাবিত্রী দেবতে ত্রিষ্টুপ্‌ছন্দঃ শিখামোচনে বিনিয়োগঃ। ওঁ প্রত্বা মুঞ্চামি বরুণস্য পাশাদ্যেন ত্বা বধ্নাৎ সবিতা সুসেবঃ। স তস্য যোনৌ সুকৃতস্য লোকে অরিষ্টাং ত্বা সহ পত্যা দধামি। ইতি দক্ষিণাশিখামোচনম্। ওঁ প্রেতো মুঞ্চামি সুদ্ধামি মামুত সুতস্করং

যথেয়মিন্দ্রমীঢ়ঃ সুপুত্রাং সুভগাং কৃণু। ইতি বামশিখামোচনম্। ততঃ প্রতীচীমারভ্য ঐশানীং যাবৎ সপ্ততণ্ডুলমুষ্টিষু বধূ
দক্ষিণপাদং গৃহীত্বা প্রথমনিক্ষিপ্তক্রমেণ ওঁ ইষ একপদী ভব সা মামনুব্রতা ভব পুত্রান্ বিন্দাবহৈ বহূংস্তে সন্তু জরদষ্টয়ঃ।
ইতি দ্বিতীয় মণ্ডলিকাগমনম্। ওঁ রায়স্পোষায় ত্রিপদী ভব সা মামনুব্রতা ভব। পুত্রান্ বিন্দাবহৈ বহূংস্তে সন্তু জরদষ্টয়ঃ।
ইতি তৃতীয় মণ্ডলিকাগমনম্। ওঁ মায়োভব্যায় চতুষ্পদী ভব সা মামনুব্রতা ভব। পুত্রান্ বিন্দাবহৈ বহূংস্তে সন্তু জরদষ্টয়ঃ।
ইতি চতুর্থ মণ্ডলিকাগমনম্। ওঁ প্রজাভ্যঃ পঞ্চপদী ভব সা মামনুব্রতা ভব। পুত্রান্ বিন্দাবহৈ বহূংস্তে সন্তু জরদষ্টয়ঃ।
ইতি পঞ্চমীম্। ওঁ ঋতুভ্যঃ ষট্‌পদী ভব সা মামনুব্রতা ভব। পুত্রান্ বিন্দাবহৈ বহূংস্তে সন্তু জরদষ্টয়ঃ। ইতি ষষ্ঠীম্। ওঁ সখা
সপ্তপদী ভব সা মামনুব্রতা ভব। পুত্রান্ বিন্দাবহৈ বহূংস্তে সন্তু জরদষ্টয়ঃ। ইতি সপ্তমীং মণ্ডলিকাম্। ইতি বধ্বা দক্ষিণ- ২১৪
পাদেনাক্রাময়েৎ। ততো ব্রহ্মা আচার্য্যো বা জীবপতিপুত্রা ব্রাহ্মণী বা বেদ্যাং দম্পত্যোঃ শিরসি সংলগ্নে কৃত্বা ঐশানী দিক্‌স্থ-
কলসোদকেনাভিষিঞ্চেৎ। ওঁ অনাধৃষ্টমস্যনাধৃষ্যং দেবানামোজোভিশস্তিপাঃ। অনভিশস্ত্যঞ্জসা সত্যমুপগেষং স্বিতে মা ধাঃ।
ওঁ যৎ কক্ষীবাং সংবননং পুত্রোঽঙ্গিরসামবেতিনা। নো অদ্য বিশ্বে দেবাঃ সংপ্রিয়ন্তাং সমবীরণাম্। ওঁ আ নঃ প্রজাং
জনয়তু রাজবায় সমনক্তুর্য্যমা। অদুর্ম্মঙ্গলীঃ পতিলোকমাবিশ শন্নো ভব দ্বিপদে শং চতুষ্পদে। ওঁ ইমাং ত্বমিন্দ্রমীঢ় সুপুত্রাং
সুভগাং কৃণু। দশাস্যাং পুত্রমাধেহি পতিমেকাদশং কৃধি। সম্রাজ্ঞী শ্বশুরে ভব সম্রাজ্ঞী শ্বশ্র্বাং ভব ননান্দরি সম্রাজ্ঞী ভব
সম্রাজ্ঞী অধিদেবৃষু। ওঁ সমুদ্রজ্যেষ্ঠাৎ সলিলস্য মধ্যাৎ পুনানায়ং ত্যনিবিশমানাঃ। ইন্দ্রো যা বজ্রী বৃষভো ররাদ তা আপো

দেবীরিহ মামবন্তু। ওঁ যা আপো দিব্যা উত বা স্রবন্তি খনিত্রিমা উত বা যাঃ স্বয়ং যাঃ। সমুদ্রার্থা যাঃ শুচয়ঃ পাবকাস্তা আপো দেবীরিহ মামবন্তু। ওঁ যাসাং রাজা বরুণো যাতি মধ্যে সত্যানৃতে অবপশ্যন্ জনানাম্। মধুশ্চ্যুতঃ শুচয়ো যাঃ পাবকাস্তা আপো দেবীরিহ মামবন্তু। ওঁ যাসু রাজা বরুণো যাসু সোমো বিশ্বে দেবা যাসূর্জ্জং মদন্তি। বৈশ্বানরো যাস্বগ্নিঃ প্রবিষ্টস্তা আপো দেবীরিহ মামবন্তু। ওঁ আপোহিষ্ঠা ময়োভুবস্তা ন উর্জ্জে দধাতন। মহেরণায় চক্ষসে। ওঁ যো বঃ শিবতমো রসস্তস্য ভাজয়তেহ নঃ। উশতীরিব মাতরঃ। ওঁ তস্মা অরঙ্গমাম বো যস্য ক্ষয়ায় জিন্বথ। আপো জনয়থা চ নঃ। তত আসনে উপবিশ্যাজ্যেন জুহুয়াৎ। যদস্যেত্যস্য হিরণ্যগর্ভঋষিঃ স্বিষ্টকৃদগ্নির্দেবতা প্রকৃতিচ্ছন্দঃ স্বিষ্টকৃদ্ধোমে বিনিয়োগঃ। ওঁ যদস্য কর্ম্মণো হত্যরীরিচং যদ্বান্যূনমিহাকরং অগ্নিষ্টঃ স্বিষ্টকৃদ্বিদ্বান্। সর্ব্বং স্বিষ্টং সুহুতং করোতু। অগ্নয়ে স্বিষ্টকৃতে সুহুতহুতে সর্ব্বপ্রায়শ্চিত্তাহুতীনাং কামানাং সমর্দ্ধয়িত্রে সর্ব্বান্নঃ কামান্ সমর্দ্ধয় স্বাহা। ইদমগ্নয়ে স্বিষ্টকৃতে ততঃ। রুদ্রায় স্বাহেতি বর্জ্জম্। ততঃ প্রায়শ্চিত্তহোমঃ। অয়াশ্চেত্যস্য বিমদঋষিরয়ানগ্নির্দেবতা পংক্তিচ্ছন্দঃ প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ অয়াশ্চাগ্নে স্যানভিশস্তিপাশ্চ সত্যমিত্ত্বময়া অসি। অয়সা বয়সা কৃতো যাসং হব্যমোহিষে অয়ানো ধেহি ভেষজং স্বাহা। ইদমগ্নয়ে নমঃ। অতো দেবা ইত্যস্য মেধাতিথির্ঋষিরগ্নির্দেবতা গায়ত্রীচ্ছন্দঃ প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ অতো দেবা অবন্তু নো যতো বিষ্ণুর্ব্বিচক্রমে। পৃথিব্যাঃ সপ্তধামভি স্বাহা। ইদং দেবেভ্যো নমঃ। ইদং বিষ্ণুরিত্যস্য মেধাতিথিঋষিঃ শ্রীবিষ্ণুর্দেবতা গায়ত্রীচ্ছন্দঃ প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ ইদং বিষ্ণুর্ব্বিচক্রমে ত্রেধা নিদধে পদম্। সমূঢ়মস্য পাংশুলে স্বাহা। ইদং ২১৫

বিষ্ণবে নমঃ। ব্যাহৃতীনাং পরমেষ্ঠীপ্রজাপতির্ঋষিরগ্নির্বায়ুঃ সূর্য্যঃ প্রজাপতির্দ্দেবতা দৈবী গায়ত্রী দৈব্যুষ্ণিক্‌দৈবী বৃহতীচ্ছন্দাংসি
প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। ইদমগ্নয়ে নমঃ। ওঁ ভুবঃ স্বাহা। ইদং বায়বে নমঃ। ওঁ স্বঃ স্বাহা। ইদং সূর্য্যায়
নমঃ। ওঁ ভূর্ভুবঃ স্বঃ স্বাহা। ইদং প্রজাপতয়ে নমঃ। অনাজ্ঞাতমিতি দ্বাভ্যাং হিরণ্যগর্ভঋষিরগ্নির্দ্দেবতা অনষ্টুপ্‌ছন্দঃ জ্ঞাতাজ্ঞাত-
দোষনির্হরণার্থং হোমে বিনিয়োগঃ। ওঁ অনাজ্ঞাতং যদাজ্ঞাতং যজ্ঞস্য ক্রিয়তে মিথঃ। অগ্নে তদস্য কল্পয় ত্বং হি বেত্থ যথাযথং
স্বাহা। ইদমগ্নয়ে নমঃ। ওঁ পুরুষসম্মিতো যজ্ঞো যজ্ঞঃ পুরুষসম্মিতঃ। অগ্নে তদস্য কল্পয় ত্বং হি বেত্থ যথাযথং স্বাহা। ইদ-
মগ্নয়ে নমঃ। যৎ পাকত্রেত্যস্য বিতথঋষিরগ্নির্দ্দেবতা ত্রিষ্টুপ্‌ছন্দঃ প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ যৎপাকত্রা মনসা দীন-
দক্ষা যজ্ঞস্য তনুতে মর্ত্ত্যাসঃ। অগ্নিষ্টদ্ধোতা ক্রতুবিদ্বি জানন্ যজিষ্ঠো দেবা ঋতুশো যজাতু স্বাহা। ইদমগ্নয়ে নমঃ। ততঃ ২৩৬
পূর্ণপাত্রমানীয় বর্হিষি নিধায়াত্মনা পরিপূর্য্য ওঁ পূর্ণমসি পূর্ণং মে ভূয়াঃ। সুপূর্ণমসি সুপূর্ণং মে ভূয়াঃ।
সদসি সদ্মে ভূয়াঃ। সর্ব্বমসি সর্ব্বং মে ভূয়াঃ। অক্ষিতিরসি মামেক্ষেষ্ঠাঃ। প্রাচ্যাং দিশি দেবা ঋত্বিজো মার্জ্জয়ন্তাম্‌ দক্ষি-
ণস্যাং দিশি মাসাঃ পিতরো মার্জয়ন্তাম্‌। প্রতীচ্যাং দিশি বেদাঃ পশবো মার্জয়ন্তাম্‌। উদীচ্যাং দিশি আপ ওষধয়ো বন-
স্পতয়ো মার্জয়ন্তাম্। ঊর্দ্ধায়াং দিশি যজ্ঞঃ সংবৎসরো মার্জয়ন্তাম্‌। সুমিত্রিয়া ন আপ ওষধয়ঃ সন্তু। ইতি পূর্ণপাত্রোদকেনা-
ঞ্জনমভ্যুক্ষ্য ওঁ দুর্মিত্রিয়াস্তস্মৈ সন্তু। ইতি বর্হির্ষি নিনয়েৎ। ততো নক্ষত্রদর্শনপর্য্যন্তং দম্পতির্মৌনমালম্ব্য রাত্রাবরুন্ধতীং
সপ্তর্ষীংশ্চ দৃষ্ট্বা ধ্রুবং তে রাজা বরুণো ধ্রুবং দেবো বৃহস্পতিঃ। ধ্রুবন্ত ইন্দ্রশ্চাগ্নিশ্চ রাষ্ট্রং ধারায়াং ধ্রুবম্‌। অবিধবা ভব

বর্ষাণি শতং সাগ্রঞ্চ সুব্রতা। তেজস্বী চ যশস্বী চ ধর্ম্মপত্নী পতিব্রতা। জনয়ত্বষ্টপুত্রাণি মা চ দুঃখং লভেঃ ক্বচিৎ। ভর্ত্তা তে সোমপো নিত্যং ভবেদ্ধর্ম্মপরায়ণঃ। অষ্টপুত্রা ভব ত্বঞ্চ সুভগা চ পতিব্রতা। ভর্ত্তুশ্চৈব পিতুর্ভ্রাতুর্হৃদয়ানন্দিনী সদা। ইন্দ্রস্য তু যথেন্দ্রাণী শ্রীধরস্য যথা রমা। শঙ্করস্য যথা গৌরী তথা ত্বমপি ভর্ত্তরি। অত্রের্যথানুসূয়া স্যাদ্বশিষ্ঠস্যাপ্যরুন্ধতী। সতী যথা কৌশিকস্য তথা ত্বমপি ভর্ত্তরি। ধ্রুবৈধিপোষ্যামযি মহ্যং ত্বাদাদ্বৃহস্পতিঃ। ময়া পত্যা প্রজাপতিঃ স জীব শরদঃ শতম্। ইতি পঠন্ ধ্রুবমীক্ষস্বেতি বরেণোক্তা জীবপত্নী প্রজাং বিবিন্দেয়ং ইতি মন্ত্রেণ বাচং বিসৃজেদ্বধূঃ। যদি ন পশ্যতি তথাপি পশ্যামি ইতি বদেৎ। জীবপতিপুত্রায়া ব্রাহ্মণ্যা গৃহে সহ বা তাং রাত্রিং গময়েৎ। রাত্রৌ তু মৌনবর্জ্জম্॥ * ॥

॥ * ॥ ইতি বিবাহ হোম প্রয়োগঃ ॥ * ॥

অথ গ্রামান্তর গমন বিধিঃ। এবমনুষ্ঠিত বিবাহো বরঃ সভার্য্যঃ গ্রামান্তরং স্বমন্দিরং বা দোলাদিনা গচ্ছেৎ। তদা পূষা ত্বেতো নয়ত্বিত্যস্য সূর্য্যাসাবিত্রীঋষিঃ সূর্য্যাসাবিত্রী দেবতা ত্রিষ্টুপ্‌ছন্দঃ যানারোহণে বিনিয়োগঃ। ওঁ পূষা ত্বেতো নয়তু হস্তং গৃহাশ্বিনৌ ত্বা প্রবহতাং রথেন গৃহান্ গচ্ছ গৃহপত্নী যথা। সো‌ঽপিনিনীঃ ত্ববিদথ মা বেদাসি। ইত্যনেন বধূং যানমারোহয়েদ্বরঃ। স্বয়ং তুষ্ণীং বিবহাগ্নিমগ্রতো দম্পত্যোর্নয়তি। স্বগ্রামেঽপ্যয়ং বিধিঃ। বর্ত্মনি বাসঃ জীবনাথ পুত্রায়া ব্রাহ্মণ্যা গৃহে কর্ত্তব্যম্। অন্তরা চেন্নদ্যস্তি তদা। অশ্মন্বতীরীয়ত ইত্যস্য সপ্তগুর্ব্বী ককুভঋষিরিন্দ্রো দেবতা ত্রিষ্টুপ্‌ছন্দঃ নাবারোহণে বিনিয়োগঃ। ওঁ অশ্মন্বতীরীয়তে সংরভধ্বং সংতিষ্ঠত প্রভবত সুখায়। ইতি পূর্ব্বার্দ্ধর্চেন হস্তং গৃহীত্বা বধূং নাবমারোহয়েদ্বরঃ। অত্রাজ্য হোমে যেষু

মন্ন মেবাহমি বান্নু যন্নুত্তরেমাভিরাজানম্। ইত্যর্দ্ধর্চ্চেন নৌত উত্তারয়েদ্বরঃ। গচ্ছন্তী বধূর্যদি বন্ধুবিয়োগাদ্রোদিতি তদা জীবং রুদন্তীত্যস্য কাক্ষীবতিঋষিরঘোশ্বিনৌ দেবতে জগতীচ্ছন্দঃ জপে বিনিয়োগঃ। ওঁ জীবং রুদন্তী বিমজন্তে বা অধ্বরে দীর্ঘামনু প্রসিতং ম্যন্নয়ধ্যে। বামং পিতৃভ্যো য ইদং স নে বিবেম যঃ পতিভ্যো জনয় পরিষ্বজে। ইতি জপেৎ। একগ্রামেঽপ্যয়ং বিধিঃ। গচ্ছন্তী বধূর্যদি গ্রামমধ্যমার্গদেশে বৃক্ষচতুষ্পথেষু প্রতিবসেৎ তদা। মা বিদন্ পরিপন্থিন ইত্যস্য সাবিত্রীঋষিঃ সূর্য্যো দেবতা অনুষ্টুপ্ছন্দঃ জপে বিনিয়োগঃ। ওঁ মা বিদন্ পরিপন্থিনো যথা সীদন্তু দম্পতী সুগেভির্দর্গমতীতামপধান্তুরাতমঃ। ইতি জপেৎ। বর্ত্মনি চেৎ বধূঃ সমীকান্ পশ্যেৎ তদা সুমঙ্গলীরিত্যস্য সাবিত্রীঋষিঃ সাবিত্রী দেবতা অনুষ্টুপ্ছন্দঃ জপে বিনিয়োগঃ। ওঁ সুমঙ্গলীরিয়ং বধূরিমাং সমেত। সৌভাগ্যমস্যৈ দত্ত্বা যথাস্তং বিপরেত ন ইতি জপেৎ। ততঃ ইহ প্রিয়মিত্যস্য সাবিত্রীঋষিঃ সাবিত্রী দেবতা ত্রিষ্টুপ্ছন্দো গৃহপ্রবেশনে বিনিয়োগঃ। ওঁ ইহ প্রিয়ং প্রজায়তে সমৃধ্যতামস্মিন্ গৃহে গার্হপত্যায় জাগৃহি সেনাপত্যা তন্বাংস্বথো জিব্রবিদথ মাবদাথ। ইত্যনেন স্বগৃহে ভার্য্যাং প্রবেশয়েৎ ॥ * ॥ * ॥ * ॥ * ॥

॥ * ॥ ইতি গ্রামান্তর গমন বিধিঃ ॥ * ॥

অথ চতুর্থী হোম প্রয়োগঃ ॥ * ॥ ওঁ স্বস্তি নো মিমীতা ইত্যাদি স্বস্তি বাচনং কৃত্বা স্থণ্ডিলে বিবাহাগ্নিং প্রতিষ্ঠা-
প্যান্বাধানং কুর্য্যাৎ। প্রাণানায়ম্য চতুর্থীহোমং করিষ্যে ইতি সঙ্কল্প্য তদঙ্গমন্বাধানং করিষ্যে দেবতাপরিগ্রহার্থং প্রজাপতিং
সমিদ্দ্ব্যাঃ ওঁ ভূর্ভুবঃ স্বঃ স্বাহা। ইদং প্রজাপতয়ে নমঃ। ইতি দ্বে সমিধাবগ্নাবাধায়। অস্মিন্নন্বাহিতেঽগ্নৌ অগ্নিং জাতবেদসং
সমিধ্যেন প্রজাপতিং প্রজাপতিঞ্চাধারদেবতে আজ্যেনাগ্নীসোমৌ চক্ষুষী আজ্যেন সূর্য্যাসাবিত্র্যঃ প্রধানদেবতা আজ্যদ্রব্যেণ ইধ্মসন্ন-
হনেন রুদ্রং বিশ্বান্ দেবান্ সংশ্রাবেন সর্ব্বপ্রায়শ্চিত্তদেবতা অগ্নিং দেবান্ বিষ্ণুং অগ্নিং বায়ুং সূর্য্যং প্রজাপতিঞ্চ জ্ঞাতাজ্ঞাতদোষনির্হর-
ণার্থং অনাজ্ঞাত মিতি তিস্রঃ আজ্যদ্রব্যেণ সাঙ্গেন কর্ম্মণা সদ্যোঽহং যক্ষে। ইতি সঙ্কল্প্য অগ্নেঃ পশ্চাৎ প্রাচীগ্রীব মুত্তরলোমানডুহ-
চর্ম্মাস্তীর্য্য পূর্ব্ববৎ পরিসমূহনপর্য্যুক্ষণপরিষেচনানি অগ্নেঃ কৃত্বা পাত্রাসাদনঞ্চকৃত্বা প্রোক্ষণীং শ্রুবমাসাদ্যেতি প্রকারেণ কৃত্বা ২১৯
তস্মিন চর্ম্মণি উপবিষ্টায়া বধ্বা অন্বারব্ধো বরঃ ইধ্মাধানমাঘারান্তং কৃত্বা আজ্যভাগৌ হুত্বা শিখিনামানমগ্নিং সংপূজ্য আ ন ইতি
চতসৃণাং সূর্য্যাসাবিত্রী ঋষিঃ সূর্য্যাসাবিত্রী দেবতা নানাচ্ছন্দাংসি আজ্যহোমে বিনিয়োগঃ। ওঁ আ নঃ প্রজাং জনয়তু
প্রজাপতিরাজরসায় সমনক্তুর্য্যমা। অদুর্মঙ্গলীঃ পতিলোকমাবিশ শন্নো ভব দ্বিপদেশং চতুষ্পদে স্বাহা। ইদং সূর্য্যায় নমঃ।
ইমাং ত্বমিন্দ্রমীঢ়ঃ সুপুত্রাং সুভগাং কৃণু দশাস্যাং পুত্রমাধেহি পতিমেকাদশং কৃধি স্বাহা। ইদং সূর্য্যায় নমঃ। ওঁ সম্রাজ্ঞী
শ্বশুরে ভব সম্রাজ্ঞী শ্বশ্র্বাং ভব। ননান্দরি সম্রাজ্ঞী ভব সম্রাজ্ঞী অধিদেবৃষু। ইত্যাদি পঠন্ চতুরাজ্যাহুতির্হুত্বা দধি প্রাশ্নাতি
বরঃ। সমঞ্জন্ত্বিত্যস্য সূর্য্যাসাবিত্রী ঋষির্দেবী অনুষ্টুপ্ছন্দঃ জপে বিনিয়োগঃ। ওঁ সমঞ্জন্তু বিশ্বেদেবাঃ সমাপো হৃদয়ানি

নৌ। সম্মাতরিশ্বা সংধাতা সমুদেষ্ট্রী দধাতু নৌ। ইত্যনেন শেষং পত্ন্যৈ প্রযচ্ছতি। যদা ত্বাহুতিশেষেণাজ্যেন বধূহৃদয়ং স্বহৃদয়ঞ্চানক্তি তদাপি সমঞ্জয়ন্তিত্যনেনৈব বিবাহবেলায়াং বধ্বা পরিধ্বতমন্বয়ম্। ওঁ সত্যেনোত্তভিতা ভূমিঃ সূর্য্যেণোত্তভিতা দ্যৌঃ। ঋতেনাদিত্যাস্তিষ্ঠন্তি দিবি সোমো অধিশ্রিতঃ। সোমেনাদিত্যা বলিনঃ সোমেন পৃথিবী মহী। অথো নক্ষত্রাণামেষামুপস্থে সোম আহিতঃ। সোমং মন্যতে পাপিবান্ যৎ সংপিপিং বধান্ত্যোষধিমিতি সূক্তার্থবিদে বিপ্রায় দদ্যাৎ। ব্রতান্তে ব্রাহ্মণান্ ভোজয়িত্বা এতান্ স্বস্তি বাচয়েৎ। ওঁ স্বস্তীতি প্রতিব্রূয়ুঃ ব্রাহ্মণা বরেণ পূজিতাঃ। স্বস্ত্যাদি বাচয়িত্বা দৌস্ত্রিয়ং তামুপগচ্ছতি মুহূর্ত্তে শোভনে তস্যা ব্রীড়া ন স্যাদযথা তথা। ইতি গৃহ্যোক্তাজ্যহোমঃ। গৃহ্যোপরিশিষ্টমতে তু চতুর্থীহোমশ্চরুণৈব। অথ চতুর্থী হোমাৎ ত্রিরাত্রে নির্ব্বৃত্তে দ্বাদশরাত্রে সম্বৎসরে বা মহাব্যাহৃতিভির্হুত্বা স্থালীপাকস্য জুহোতি। অথাজ্যাহুতয়ঃ। ওঁ ভূরগ্নয়ে চ পৃথিব্যৈ মহতে চ স্বাহা। ওঁ ভুবো বায়বে চান্তরীক্ষায় মহতে চ স্বাহা। ওঁ স্বরাদিত্যায় চ মহতে চ স্বাহা। ওঁ ভূর্ভুর্বঃস্বশ্চন্দ্রমসেচ নক্ষত্রেভ্যোদিভ্যশ্চ প্রজাপতয়ে চ মহতে চ স্বাহা ইত্যাজ্যাহুতয়ঃ। অথ চর্ব্বাহুতয়ঃ। ওঁ অগ্নে প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি যাস্যাঃ পতিঘ্নী তনুস্তামস্যামপজহি স্বাহা। ইদমগ্নয়ে নমঃ। ওঁ বায়ো প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি যাস্যাঃ পতিঘ্নী তনুস্তামস্যামপজহি স্বাহা। ইদং বায়বে নমঃ। ওঁ সূর্য্য প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি যাস্যা অপুত্র্যা তনুস্তামস্যামপজহি স্বাহা। ইদং সূর্য্যায় নমঃ। ওঁ অর্য্যমণং নু দেবং কন্যামগ্নিমযক্ষত। স ইমাং দেবোঽর্য্যমা প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। ইদমর্য্যম্নে নমঃ। ওঁ বরুণং নু দেবং কন্যামগ্নিমযক্ষত। স ইমাং দেবো বরুণঃ প্রেতো মুঞ্চাতু

মামুতঃ স্বাহা। ইদং বরুণায় নমঃ। ওঁ পূষণং নু দেবং কন্যামগ্নিমযক্ষত। স ইমাং দেবঃ পূষা প্রেতো মুঞ্চাতু মামুতঃ স্বাহা। ইদং পূষ্ণে নমঃ। হিরণ্যগর্ভঋষিঃ প্রজাপতির্দ্দেবতা গায়ত্রীচ্ছন্দঃ আজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে নত্বদেবতান্যন্যো বিশ্বা জাতানি পরিতা বভুব। যৎকামাংস্তে জুহুমস্তন্নো ঽস্তু বয়ং স্যামঃ পতয়ো রয়ীণাং স্বাহা। ইদং প্রজাপতয়ে নমঃ। চরুণা স্বিষ্টকৃতং সমাপ্য আজ্যেন প্রায়শ্চিত্তং সমাপয়েৎ ইতি। আজ্যহোমশ্চরুহোময়োরপি সতোশ্চরুণা স্বিষ্টকৃদিতি পরিশিষ্টক্তো-ক্তম্। ততো ব্রাহ্মণায় দক্ষিণাং দদ্যাৎ ভোজয়েচ্চ। তে তৃপ্তা আশিষং দদ্যুরিতি ॥ * ॥ * ॥

॥ * ॥ ইতি শ্রীবাসুদেব ভট্ট বিরচিতাশ্বালায়ন পদ্ধতৌ চতুর্থী হোম প্রয়োগঃ ॥ * ॥

অথ গর্ভাধান প্রয়োগঃ। গৃহ্যপরিশিষ্টোক্তেন গর্ভাধানমিহোচ্যতে। শুভলগ্ন তিথিষু মাতৃপূজাপূর্ব্বকমাভ্যুদয়িকং কৃত্বা কর্ত্তা উলেপনাদ্যগ্নিপ্রতিষ্ঠাপনান্তং কৃত্বান্বাধানং কুর্য্যাৎ। প্রাণানায়ম্য মারুতনামানমগ্নিং সংস্থাপ্য পূর্ব্ববদৌপাসনং হুত্বা তস্মিন্নেবাগ্নৌ অদ্যেত্যাদি কর্ত্তব্য গর্ভাধানং কর্ম্ম তদঙ্গমন্বাধানঞ্চাহং করিষ্যে ইতি সঙ্কল্প্য ঘৃতাক্তামেকাং সমিধং হুত্বা অস্মিন্নন্বাহিতে ঽগ্নৌ অগ্নিং জাতবেদসমিধ্মেন প্রজাপতিং প্রজাপতিঞ্চাঘারদেবতে আজ্যেনাগ্নীসোমৌ চক্ষুষী আজ্যেন প্রজাপতিং প্রধানদেবতাশ্চরু-দ্রব্যেণ অগ্নিং স্বিষ্টকৃতং হবিঃ শেষেণ রুদ্রমিধ্মসন্নহনেন বিশ্বান্ দেবান্ সংস্রাবেণ বিষ্ণুর্যোনিমিতি তিস্রঃ নেজমেষিতি তিস্রঃ প্রজাপতে নত্বদিত্যেকাজ্যদ্রব্যেণ সর্ব্বপ্রায়শ্চিত্তদেবতা অগ্নিং দেবান্ বিষ্ণুং অগ্নিং বায়ুং সূর্য্যং প্রজাপতিঞ্চ জ্ঞাতাজ্ঞাতদোষ-

নির্হরণার্থমনাজ্ঞাতমিতি তিস্রঃ আজ্যদ্রব্যেণ সাঙ্গেন কর্ম্মণা সদ্যোঽহং যক্ষে ইত্যুচ্চার্য্য ওঁ প্রজাপতয়ে স্বাহা। ইদং প্রজাপতয়ে নমঃ। ইত্যাজ্যাক্তে সমিধাবগ্নাবাধায় পূর্ব্ববৎ পরিসমূহনাদি আজ্যভাগান্তং বিভাগবর্জ্জং কৃত্বা পূর্ব্বোক্তাবদানধর্ম্মেণ সুচা প্রাজাপত্যং চরুমাদায়। ওঁ বিষ্ণুর্যোনিং কল্পয়তু ত্বষ্টা রূপাণি পিংষতু। আসিঞ্চতু প্রজাপতির্ধাতা গর্ভং দধাতু তে স্বাহা। ইদং বিষ্ণবে নমঃ॥ ১ ॥ ওঁ গর্ভং ধেহি সিনীবালি গর্ভং ধেহি সরস্বতি। গর্ভং তে অশ্বিনৌ দেবা বাধত্তাং পুষ্করস্রজৌ স্বাহা। ইদং বিষ্ণবে নমঃ॥ ২ ॥ ওঁ হিরণ্ময়ী অরণীয়ং নির্ম্মন্থিতোঽশ্বিনা তে গর্ভং হবামহে দশমে মাসি সূতবে স্বাহা। ইদমশ্বিনীকুমারাভ্যাং নমঃ॥ ৩ ॥ নেজমেষিতি তিসৃণাং হিরণ্যগর্ভঋষির্বিষ্ণুর্দ্দেবতা অনুষ্টুপ্‌ছন্দশ্চরুহোমে বিনিয়োগঃ। ওঁ নেজমেষ পরাপত সুপুত্রঃ পুনরাপত। অস্যৈ মে পুত্রকামায়ৈ গর্ভমাধেহি যঃ পুমান্ স্বাহা। ইদং বিষ্ণবে নমঃ॥ ৪ ॥ ২২৯
ওঁ যথেয়ং পৃথিবী মহ্যুত্তানা গর্ভমাদধে। এবং তং গর্ভমাধেহি দশমে মাসি সূতবে স্বাহা ইদং বিষ্ণবে নমঃ॥ ৫॥ ওঁ বিষ্ণো শ্রেষ্ঠেন রূপেণাস্যাং নার্য্যাং গর্ভিণ্যাং পুমাংসং পুত্রমাধেহি দশমে মাসি সূতবে স্বাহা। ইদং বিষ্ণবে নমঃ॥ ৬ ॥ ওঁ প্রজাপতে নত্ব-দিতি হিরণ্যগর্ভঋষিঃ প্রজাপতির্দ্দেবতা ত্রিষ্টুপ্‌ছন্দশ্চরুহোমে বিনিয়োগঃ। ওঁ প্রজাপতে নত্বদেতান্যন্যো বিশ্বা জাতানি পরিতা বভূব। যৎকামাংস্তে জুহুমস্তন্নোঽস্তু বয়ং স্যামঃ পতয়ো রয়ীণাং স্বাহা। ইদং প্রজাপতয়ে নমঃ। ইতি সপ্ত চর্ব্বাহুতীর্জ্জুহোতি। রথেন দস্যুমিত্যস্য আত্রেয়ো বসুশ্রুতঋষিরগ্নির্দেবতা ত্রিষ্টুপ্‌ছন্দঃ অগ্ন্যুপস্থানে বিনিয়োগঃ। ওঁ রথেন দস্যুং প্রহি-তাতয়স্ব রয়ক্ষণান্ স্বেস্বায়ো পিপর্ষি যৎ সহ সম্পত দেবানশো অগ্নে পাহি নৃতমবাজে অস্মান্। বয়ন্তে অগ্ন উকথৈ